It ends: चक्रेचंद्रकलासुगोपितशश्लोकपदोल्लासिनी(!)
स त्रैलोक्यकवींद्रचंद्रतिलकः श्रीबोपदेवः कविः १०० ॥
इति श्रीबोपदेवविरचिता शतश्लोकी समाप्ता ॥

[Dr. J. Taylor.]

2728.

42b. Foll. 30; size 9½ in. by 4 in.; fairly good, modern Devanāgarī writing; nine lines in a page.

Pākāvalī, a compilation on pharmacology, containing prescriptions for the preparation of different concoctions (*pāka*); with a Hindī translation of the ingredients embodied in a *Ṭīkā* following the description of each *pāka*.

It begins: अथ पाकावली लिख्यते ॥
कपिकच्छुः प्रस्थमेकं क्षीरद्रोणे विपातयेत् ।
घृतस्य कुडवं(!) दद्यात् शिताद्विप्रस्थमादिशेत् ॥ १ ॥

It ends: इति विजयापकः ॥ इति श्रीपाकाध्याय समाप्तं ॥

Cf. Dietz, Anal. Med., p. 139.

This MS. is followed, in the same volume, by a Hindī medical treatise called *Rāmavinoda*.

[H. T. Colebrooke.]

2729.

2098d. Foll. 27, one of which (15) is wanting; size 7¼ in. by 4 in.; legibly written, in Devanāgarī, by two or three different hands, about 1600 A.D.; 8–11 lines in a page.

[*Pākāvalī*], a similar series of pharmaceutical recipes, with directions for their use in different maladies. Incomplete and incorrect.

It begins: अथ लिवंगादि(*r.* लवंगादि)पाक[:] लिख्यते ।०

प्रस्यार्धं देवकुसुमं गव्यं दुग्धं च मानकं ।
घृतप्रस्तार्धसंयुक्तं शर्कराप्रस्तमेव च ॥ १ ॥
शनैर्मृग्निपाचितं चूर्णं तानि क्षपयेत्(!)।
एतत् चूर्णप्रदातव्या नीलोत्पलं एलचंदनं(!) ॥ २ ॥

The successive *pākas* are named after the principal ingredient, many of which appear in a Persian-Hindustani form.

It ends: इति अगस्ताहरीतकीपाकः ॥

The above collective title is inscribed in pencil on the first page. [Gaikawar.]

2730.

1351A. Foll. 18; size 10 in. by 4½ in.; indifferent Devanāgarī writing of the latter part of last century; eleven lines in a page.

Kalpalatā, a treatise on quack medicines prepared from various plants. [A.] Very incorrect.

It begins: अथ औषधीकल्पः ॥
[षड्विंशवर्षदेशीय पुमान्कुर्याद्रसायनं ।
पंचाशद्वर्षिको वापि कृत्वा तत्रावसीदति ॥ १ ॥
अथ लक्ष्मणाकल्पः ॥ marg.]
कृष्ण(शुक्ल B, orig. A)पक्षे चतुर्दश्यां गुरुपुष्ये ऽथ [लक्ष्मणां ।
स मंत्रं तु समुच्चार्य सोपचारं समुद्धरेत् ॥

ओं सर्वार्थसाधिनीलक्ष्मणायै(सर्वार्थसाधिनिलक्ष्मणे marg. corr.) स्वाहा ॥

शुभं तन्मूलमादाय कृष्णोन्मत्तफलस्थितं ।
त्रिदिनं तु स्वभुक्तेण मंत्रेणानेन वश्यकृत् ॥
रोचनालक्ष्मणामूलं चंदनं कुंकुमं [समं marg.; गुरुमुखले पादितं सर्वं विशेषान्नरमोहनं ॥ [कुंकुमं B]

वशी नमो नमः ॥

तन्मूलमेव स्वर्णार्थ्यंङ्गन्नररसभावितं ।*
तद्रूपधूपितं धूपं दृष्ट्वा सद्यो विमुह्यति ॥

---

* Thus corr. A (? स्वर्णं स्याद् ध०); तन्मूलं मूलमेवार्थ्यंङ्ग० B, orig. A.

ईश्वरीकल्पः ॥ ओं ईश्वरी सर्वेदानववशंकरी तारासाधिनीये(!) स्वाहा इत्यमुना मंत्रेण संवेष्ट्य गुटिकां संप्रपूजयेत् °

अथ पलाशकल्पः fol. 2b; अथ कृष्णहरिद्राकल्पः ib.; अथ कटुरोहिणीकल्पः 3a; अथ अश्वगंधाकल्पः ib.; etc.

It ends:

सर्वेषां विषकीटानां वारिनस्येव(!)नश्यति ।
स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषं ॥
अजीर्णं विविधं भूतं पुष्पं च सर्विषा स[ह B] ।
वारि नश्यंति(!) सर्वत्र विषनाशनम् ॥
इति श्रीकल्पलता शिवेन प्रोक्ता समाप्ता ॥

The outside page of the last leaf has the title वैद्यकल्पलतासं° written by another hand.

[H. T. Colebrooke.]

2731.

1351D. Foll. 30; size 10 in. by 4½ in.; indifferent, modern Devanāgarī writing, 8–11 lines in a page.

The same treatise. [B.]

This copy was apparently made from the same MS. as the preceding one, if not from that MS. itself, before corrections had been made in it.

On fol. 1a another hand has written the title औषधीकल्पसं° (which, in point of fact, is merely the first subject of the treatise); and the leaves are marked औष° कल्पः ॥

[H. T. Colebrooke.]

2732.

2071a. Foll. 60; size 11 in by 5¼ in.; good, modern Devanāgarī writing; nine lines in a page.

Āyurvedamahodadhi, or a chapter from it, called *Annapānavidhi*, treating of dietetics and articles of food, by *Sushenadeva*.

It begins:

नत्वा धन्वंतरिं देवं गणाध्यक्षं दिवौकसां ।
अन्नपानविधिं वक्ष्ये समस्तमुनिसंमतं ॥ १ ॥

ऋतुदिवसामध्ये(?)

तान्नीये(*sic* AB; ?r. तार्तीये) निपुणा वदंति जलदं [तस्मात्त्रिशीर्षे शरत्
पूर्वैः शैशिरिकस्ततो हिमऋतु[:] सूर्योदयादग्रतः ।
मध्याह्ने च तथा वदंति निपुणा ग्रैष्मीऋतुः स्यात्ततो
वासंती कथिता ऋतुस्तु मुनिभिः पूर्वाह्णमेवं सदा॥२॥

हरीतकीगण ।

पीयूषं पिबतो विहंगमपतेर्ये बिंदवो विच्युताः
तेभ्यो ऽभूदभया दिवाकरकरश्रेणीव दोषापहा ।
कालिंदीव मलप्रहर्षजननी गंगेव शूलिप्रिया
वह्नेर्दीप्तिकरी घृताहुतिरिव क्षोणीव नानारसा॥३॥°८॥

सुखेनदेव उवाच॥ तत्रादौ सकलसंजीवनद्रव्यप्रधानवारिगुणाः कथ्यंते ।

स्वादुपाकरसंशीतं त्रिदोषशमनं तथा ।
पवित्रमतिपथ्यं च गांगं वारि मनोहरं ॥ ९ ॥°

इत्यायुर्वेदमहोदधौ श्रीसुखेनकृते पानीयगुणाः. समाप्ताः fol. 8a; इत्या° जलादिपानस्य विधिः fol. 9a; इत्या° क्षीरवर्गः fol. 12a; °दधिवर्गः fol. 14b; °तक्रवर्गः fol. 16b; °घृतवर्गः fol. 18b; °तैलवर्गः fol. 19b; मधुवर्गः fol. 20b; °इक्षुवर्गः fol. 22b; etc.

It ends (with some obvious corrections in the stanza): इत्यायुर्वेदमहोदधौ श्रीसुखेनदेवविरचिते अन्नपानविधिः समाप्तः ॥

एकोऽंशो रुचकादुभौ मरिचतः शुंठ्यास्त्रयो जीरका[च्]
चत्वारो ऽधिकृतात्समुद्रलवणाद्भागस्तथा सैंधवात् ।
चूर्णं सिंहलभभुजा निगदितं तक्रेण संयोजितं
गुल्माध्मानविषूचिकामयहरं स्याद्भोजनांते सदा ॥ १ ॥

इति श्रीसुखेनसंपूर्णं समाप्तिमगमत् ॥

Owing to the interchange of ष and ख, so common in MSS., the author's name has been sometimes erroneously taken to be *Śrīsukha*, or even *Śrīmukha*. According to Fitz-Edw. Hall, Pref. to *Vāsavadattā*, p. 52, a *Sushena* was the son of King *Prabhākaravardhana's* physician.

Cf. Dietz, Anal. Med., p. 154.

[Gaikawar.]

2733.

1944. Foll. 50; size $10\frac{3}{4}$ in. by 5 in.; good, modern Devanāgarī writing; ten lines in a page.

Āyurvedamahodadhi. [B.]

In this MS. also the author's name is spelt *Sukhena* throughout; and *Sukhena* in the title on fol. 15*b*. The leaves are marked सुखे°, sometimes सुख° J. TAYLOR.

2734.

2623. Foll. 52; 4to, size $11\frac{1}{2}$ in. by $8\frac{1}{2}$ in.; coarse Indian paper; modern Telugu handwriting; 15–18 lines in a page. Rather incorrect.

Rasapradīpikā, a treatise on drugs, with a partial commentary, by *Maṅgalagiri Sūri,* son of *Jagannātha,* of the *Gelavaṅgala-vaṃśa.*

A. Foll. 10–31. *Rasapradīpikā,* in four *adhyāyas.*

It begins:

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥
नमामि धन्वंतरिमादिदेवं सुरासुरैर्वंदितपादपद्मं ।
लोके जरारुग्भयमृत्युनाशं दातारमीशं विविधौषधीनां
[(cf. no. 2728.)॥

इस्ति (*r.* अस्ति) नीहारनिलयो महानुत्तरदिङ्मुखे ।
उत्तुंगशृंगसंघातलंघिताभ्रो महीधरः ॥

यत्रास्ति सर्वजगतामादिदेवो महेश्वरः ।
रसात्मना जगत्त्रातुं जातो यत्र दयारसः ॥

शैलेस्मिन् शिवयोः प्रीत्या परस्परजिगीषया ।
संप्रवर्ते (? संप्रवृत्ते) तु संभोगे त्रिलोकक्षोभकारणे ॥

विनिवारयितुं वह्नि[:] संभोगं प्रेक्षितैः(? प्रेषितः) सुरैः ।
कांक्षमाणैस्तयोः पुत्रं तारकासुरमारकं ॥

कपोतरूपिणं प्राप्तं हिमवत्कंदरे[ऽ]नलं ।
अनक्षिभावसंक्षिप्तं स्मरलीलावलोकिनं ॥

तं दृष्ट्वा लज्जितः शंभुर्विरतः सुरतस्तया (? सुरतात्तदा) ।
प्रक्षिप्तो वदनो (*r.* वदने) वह्नेर्गंगायां सोप्यपातयत् ॥

वह्निः क्षिप्तस्तया सोपि परिदंदह्यमानया ।
संजातास्तन्मलानानां (? तन्मया नाना) धातवः सिद्धहेतवः ॥

यावदग्निमुखाद्रेतो न्यपतद्भूमिभागतः ।
शतयोजननिम्नस्थं कृत्वा कूपाश्च पंच च ॥

रसो रसेंद्रः सूतश्च पारदो मिश्रिकस्तथा ।
इति पंचविधो जातः क्षेत्रभेदेन शंभुजः ॥°

Adhy. I. *rasaśuddhibhasmādhikāra,* ends fol. 15*b*; II. *mahārasoparasasādhāraṇarasānāṃ śuddhibhasmādhikāra,* fol. 22*a*; III. *navaratna-śuddhibhasmādhikāra,* fol. 24*b*; IV. *navaloha-śuddhibhasmasindūrādhikāra,* ends:

कृत्वांध्रमूलं (!) संरुध्य वालुकायंत्रके पचेत् ।
वालाग्निना पचेत्सम्यक् शनैश्च घटिकात्रयं ॥
पश्चादर्चिषमुद्धृत्य तिष्ठती सूतये पचेत् ।
अनेनैव प्रकारेण कुरुते गगनादिकान् ॥

इति रसप्रदीपिकायां नवलोहशुद्धिभस्मशिंदूराधिकारो नाम चतुर्थोध्यायः ॥

B. Foll. 1–9. A commentary on the first *adhyāya* of the *Rasapradīpikā.*

It begins:

नमामि धन्वंतरिमादिदेवं सुरासुरैर्वंदितपादपद्मं ।
लोके जरारुग्भयमृत्युनाशं दातारमीशं विविधौषधीनां ॥

अस्त्युत्तरस्यां दिशि उत्तुंगशृंगसंघातलंघिताभ्रः पूर्वपश्चिमसागरापरः नगाधिराजः । तस्य हिमाचलस्य महेश्वरनिवासस्यान्नत्वात् तं महेश्वरं ब्रह्मादयः निखिललोकप्रापंचकवर्तमानव्यावहारिकान् विज्ञापयन् (!) तत्र किमिति त्रिपुरपट्टणमध्ये रसकूपस्य स्थितत्वात् तद्रसकूपमहीयस्त्वात् यक्षसिद्धगंधर्वदेवनरकिंनरकिंपुरुषदिक्पालकलोकान् निर्मूलयति तस्य त्रिपुरस्य बहुयोजनविस्तीर्णत्वात् । खेचरभूपरत्वाच्च लोहमयत्वात् कामगमनत्वाच्च त्रयाणां पुराणां समाहारत्वाच्च तत्त्रिपुरमीश्वरं विना भेत्तुं देवादयः अशक्ताः अभवन् । तथा हि तं बहुलोकोपद्रवं तत्त्रिपुरमीश्वर एव ससाद । तत्प्रभृति माहेश्वरस्य (*r.* म°) त्रिपुरांतक इति पदं लो[के]षु जगत्प्रसिद्धं । तत्त्रिपुरपट्टणमध्ये रसस्थानं कथमित्यत्र गंगायां शिववीर्यं वह्नेः विसृष्टत्वात् (!) परिदंदह्यमानया गंगया विसृष्टं त्रिपुरासुरनिकरः मृगयाविनोदार्थं गच्छन् सन् गंगातटनटच्छटच्छटाघटितचंद्रिकापादितमनोहरं (!) हरवीर्यं जहार तस्य त्रिपुरस्य लोहमयत्वात् लोहान् (!) रसस्य ग्रस्तत्वात् । तत्कृतकभूमिवरे रक्षां रसमास्थापयन् इति पुराणेषु प्रसिद्धिः ।°

It ends: इति श्रीमल्लेलवंगलवंशपारावारसुधाकररसशस्त्रशास्त्रमूलिकामांत्रिकातांत्रिकादिसकलवैद्यविद्यामुखांबुजप्रभाकर आत्रेयसगोत्रजगन्नाथपुत्रमंगलगिरिसूरिविरचितायां रससूत्राभिधानं नाम प्रथमोध्यायः ॥ रसखंडशिरोमणि संपूर्णम् ॥

The remaining portion of the volume (foll. 32–52) is in the Telugu language.

[Mack. Coll.]

2735.

2176. Foll. 73; size 11 in. by 5½ in.; good, modern Devanāgarī writing; nine lines in a page.

Kshemakutūhala, a manual of cookery based on hygienic principles, composed (? in 1548 A.D.) in twelve chapters (*utsava*), by *Kshemaśarman,* son of *Manmatha,* and grandson of *Dūdani.*

It begins:

कपोलमलनिर्गतप्रमदवारिधारालसत्-
षडंघ्रिकुलकाकलीकलितमंजुकोलाहलः ।
गिरीशतनयो गुरुः सकलसिद्धिवारां निधिर्
भिनत्तु दुरितानि वः सततमोदकादः सदा ॥ १ ॥

हृदयभुजविशालः कंठमंदारमाला-
समरभुवि करालः शोचिषा शोभिभालः ।
दनुजविचयकालः सर्वलोकैकपालः
स जयति मतिशालस्सद्मगोपालबालः ॥ २ ॥

भरद्वाजकुलांभोधिवलक्षा पक्षयोर्द्वयोः ।
द्विजराजततिर्जाता निष्कलंका सदा ऽक्षया ॥ ३ ॥

सल्लाहरूढान्वयभूषणो ऽभूत्
स लक्ष्मणो लक्षणपूर्णगात्रः ।
भिषग्वरो राक्षसराजधान्यां
विभीषणं यो न्यगदं(? व्य०) व्यधत्त ॥ ४ ॥

तदन्वये धर्मधरः समजनि भिषजां शिरोरत्नं ।
येनाधानि जरस्थः सुश्रुतविदुषा रुजां निचयः ॥ ५ ॥

अजनि तदनु रामः सत्सुहृत्पूर्णकामः
सुकृतगमितयामः पुण्यकर्मैकधामः ।
गदनिचयविदारी वैद्यविद्याविहारी
बुधजनसुखकारी साधुमार्गप्रचारी ॥ ६ ॥

समभूत्पतिस्तस्य(!) सुतो महौजा
विज्ञातभैषज्यकलाकलापः ।
हृषीकचक्रं प्रथमं विजित्य
व्यजेष्ट यो व्याधिभयं प्रजानां ॥ ७ ॥

यशोराजो महाराजः प्रह्लादः कामजारकः(!) ।
निज(marg. corr. दूद)निस्त्रिपुरारिश्च षट् सुतास्तस्य [जज्ञिरे ॥ ८ ॥

शीलचातुर्यविज्ञानकलाभैषज्यसंपदः ।
यशां समानां भाग्येन महाराजो ऽधिको ऽभवत् ॥ ९ ॥

येनाराधि शकेश्वरो निजकलाकौशल्यमातन्वता
दिल्लीनाम्नि पुरे स्वपाटवबलैर्वेदीव निर्मोचिता(!) ।
नीतो ग्रामगडाजरो दशपुरैः साकं शकाधीशतो
धन्यो ऽभून्महराज एव भिषजां चक्रैकचूडामणिः ॥१०॥

दूदनिस्तदनुजो बहुतेजा
वाग्भटं चरकसुश्रुतशास्त्रं(°स्त्रे) ।
शीलयन्ननिशमीशसादरः
शर्म कस्य न ततान भूतले ॥ ११ ॥

मन्मथो जयशर्मा च वामदेवो ऽथ पंडितः ।
सूर्यदासश्च विख्यातो दूदनेः पंच सूनवः ॥ १२ ॥

आचार[:] पटुता विवेकविधयः कौलीनमत्यद्भुता
भैषज्याश्रितचातुरी प्रियवचःपांडित्यसत्संगता ।
पुण्यं पापविरक्तिशक्तिमतयो दीने सदा दानता
सर्वो मन्मथमाश्रितो गुणगणः श्रीकांतपूजारतं ॥ १३ ॥

क्षेमशर्ममल्लिनाथसंज्ञकौ
तत्सुतावभवतां मनोरमौ ।
यौ विलोक्य न भुवं समागतौ
लज्जयेव भिषजौ दिवः पुनः ॥ १४ ॥

अकृतनिजविपक्षस्तर्कविद्यासुदक्षः
कलितसुजनरक्षः काव्यकेलीषु दक्षः ।
विधिविहितसुकर्मा संचितानेकधर्मा
विदितसुकविमर्मा राजते क्षेमशर्मा ॥ १५ ॥

क्षेमो विक्रमसेनभूपतिलकं संसेव्य विद्वज्जनैर्
मंत्रक्षात्रकलावतंसमभवद्भैषज्यविद्याविभुः ।
पात्रापात्रविवेकवान्यरहिताधाने सदा सादरस्
तद्दत्ते च पुरे सुधामयजलापूर्णां व्यधाद्वापिकां ॥ १६ ॥

शीतेव शीता(!) जननी यदीया
नेया परेस्या(!) पतिदेवतानां ।
स क्षेमशर्मा कृतसूपकर्मा
शर्माणि धत्ते न कथं परेषां ॥ १७ ॥

वैकुंठलोकमगमद् दहनं प्रविश्य
शीता सती सुकृतचारुविचारदक्षा ।
भर्त्रा सह प्रथितशीलगुणोदयेन
श्रीनिंबशाखकुलभूषणरत्नशोभा ॥ १८ ॥

श्रीसूर्यदासगुरुपादसरोजसेवा-
हेलाधिना परिहितार्थपरायणेन ।
क्षेमेण तर्कपदवाक्यविचारदक्षा
ग्रंथस्य कर्मविधये धिषणा व्यधायि ॥ १९ ॥

ग्रंथं व्यधत्त सुरसं त्वमृतप्रपूर्णं
क्षेमं क्षमाजलनिधिर्द्विजदेवभक्तः ।
भूमंडले कृतनिवासजना यदीय-
पादार्धभावरसिका न सुधां धयंति ॥ २० ॥

गौरीमतं च नलवाग्भटभीमसूक्तिं
हारीतसुश्रुतमतं रविसिद्धपाकं ।
क्षेमो भिषग्वरसुधीरवलोक्य सम्यग्
ग्रंथं व्यधत्त खलु क्षेमकुतूहलाख्यं ॥ २१ ॥

इष्टदेवनमस्कारस्ततो वंशप्रशंसनं ।
सगुणो वस्तुनिर्देश उक्तश्च प्रथमोत्सवे ॥ २२ ॥ °

I. *vaṃśapraśaṃsana*, fol. 3*b*; II. *mahānasopayogyopakaraṇapr.*, fol. 6*a*; III. *vaidyāhārasūpakārapr.*, fol. 9*a*; IV. *ritulakshaṇacaryāpr.*, fol. 12*a*; V. *dinacaryāpr.*, fol. 17*a*; VI. *māṃsapr.*, fol. 31*a*; VII. *matsyamāṃsapr.*, fol. 33*b*; VIII. *shaḍvidhaśākapr.*, fol. 47*b*; IX. *pishṭānnakritaprakārapr.*, fol. 52*a*; X. *pakvānnapr.*, fol. 61*a*; XI. *kshudbodhakavastupr.*, fol. 63*b*; XII. *gorasapānakādikathana.*

It ends:

वंशो ऽयं किमु वर्ण्यते सुविमलो नानागुणैरुत्तमो
यत्रैकेन विभीषणाश्च भिषजा नीरोगतामाप्नवान् ।
श्रीरामादपरेण या सुविहिता लब्धा हि कोलापुरी
ग्रामा द्वादश एव चान्यविदुषा लब्धा हि दिल्लीश्वरात् ॥

पुत्राः क्षेमभिषग्वरस्य षडिमे नानागुणैरुत्तमा
गोपालः शिवपालमाधववरौ नारायणस्त्वद्भुतः ।
रामो लक्ष्मणसंज्ञकाः(!) सुविहिताः संवत्सराणां शतं
जीव्यासुः पृथिवीतले ऽतिसुखिनो नित्योत्सवैरुत्सुकाः ॥

प्रजाक्षेमकृता क्षेमशर्मणा वंशपद्धतिः ।
स्वकीया स्वयमावर्णि वर्णविन्याससालिना ॥

परदोषकथास्वनादरा बहवः संति क्षितौ सुजनाः ।
इति चेतसि संविधाय यत्कृतमाद्रियतां तदार्थकैः ॥

नंदंतां नीतिभाजः सकलवसुमती ज्ञानमायातु विश्वं
दुर्वृत्ता यांतु नाशं भवतु वसुमती सम्यगासन्नदेवा(वी) ।
नीरं यच्छंतु मेघाः कलयतु सुकविः काव्यकौशल्यलीलाम्
अव्यादव्याजभाजं परहृतदुरितं क्षेमशर्माणमीशः ॥

बाणाकाशयुतेनाब्दवत्सरे विक्रमांकिते ।
ऊर्जेषु शुक्लत्रयोदश्यां ग्रंथः पूर्णो ऽयमैंदवे ॥

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्मविरचिते क्षेमकुतूहले द्वादशोत्सवः । समाप्तो ऽयं ग्रंथः ॥

In the above chronogram, Dr. Haas suggests that we should read बाणाकाशक्षितिनाथवत्सरे विक्रमांकिते, which would make the date of the work Saṃvat 1605 (1548 A.D.). Perhaps नाथ for नाब्द alone might suffice.

The imperfect Berlin MS. of the work (Cat., no. 950) was copied in Saṃvat 1721.

[GAIKAWAR.]

C. MATERIA MEDICA.

2736.

1507b. Foll. 51; size 11½ in. by 4¼ in.; legibly written, in Devanāgarī; 8–13 lines in a page.

Dhanvantari-nighaṇṭu, a dictionary of materia medica, in nine chapters (*varga*).

After the first 14 verses: नमामि धन्वंतरिमादिदेवं ° (see Aufrecht, Oxf. Cat., no. 451), this MS. proceeds:

द्रव्यावलीं विना वैद्यास्ते वैद्या हास्यभाजनाः ।
द्रव्यावल्यभिधानानां तृतीयमपि लोचनं ॥ १५ ॥

अनंतसारस्य निगृह्य किंचित्
सारं चिकित्सागमसागरस्य ।
उक्तं मयेदं प्रविभोज्य भोज्यं
द्रव्यावली नाम समुच्चयो ऽयं ॥ १६ ॥

Then follows a versified summary of the first six chapters, ending fol. 4*b*: इति धन्वंतरिनिघंटे गणसमुच्चयः समाप्तः॥ after which it proceeds: गुडूच्यमृतवल्ली च०.

The MS. is dated: संवत् १८५७ रौद्राब्दनामसंवत्सरे नर्मदादक्षिणभागे ॥ [H. T. COLEBROOKE.]

2737.

1114. Foll. 55; size 12½ in. by 4½ in.; fairly good Devanāgarī writing; 9 or 10 lines in a page.

The same work, without the *gaṇasamuccaya*.

After the first 14 verses, this MS. proceeds:

क्वचिद्रूक्तं विपर्यस्तं दृष्टं नामेह तद्यथा ।
मधुपर्णीवेतसाम्नो रोहिणीकटुकादिकाः ॥

गुडूचीनाम । गुडूच्यमृतवल्ली च०

The text of this MS. differs considerably from that of the preceding one. It also contains only seven chapters, the last being the *miśrakavarga*.

It ends:

इति ये क्रमशः सप्त वर्गाः [प्राक्]परिकीर्तिताः ।
सूतचित्तानां(!) द्रव्याणां गुणनामविनिर्णये ॥

इतीदमुक्तं निखिलं निघंटुज्ञानमुत्तमं ।
भिषजां बुद्धिवृद्ध्यर्थं धन्वंतरिविनिर्मितं ॥

सप्तद्वीपावती यावद्यावत्सप्तांबुराशयः ।
तावन्निघंटुरित्येष भुवि द्रव्यप्रकाशकः ॥

इति श्रीधन्वंतरिप्रणीतनिघंटु समाप्तं ॥ श्रीसंवत् १८६१ माघमासे शुक्लपक्षे परिवाया सुक्रवासरे(!) ॥

[H. T. COLEBROOKE.]

2738.

987b. Foll. 35; size 14¼ in. by 4½ in.; good, clear, modern Bengali handwriting; 7 or 8 lines in a page.

Śabdacandrikā, a medical dictionary, by *Cakrapāṇidatta*.

It begins:

देवं प्रणम्य हेरम्बं वैद्यश्रीचक्रपाणिना ।
भैषज्यशब्दबोधाय क्रियते शब्दचन्द्रिका ॥

See Aufrecht, Oxf. Cat., no. 453.

The *vṛikshādivarga* ends fol. 71*a*; *svarṇādivarga*, fol. 72*b*; *ghṛitādivarga*, fol. 73*b*; *bhūmyādivarga*, fol. 76*a*; *manushyavarga*, fol. 78*b*; *siṃhādivarga*, fol. 82*b*; *madyādivarga*, fol. 84*a*; *pañcakashāyādivarga*, fol. 86*a*; *triphalādivarga*:

अलाभादधिकाख्याया मयोक्तं नेह यत्क्वचित् ।
शब्दार्णवादिकोषेभ्यस्तज्ज्ञातव्यं भिषग्वरैः ॥

[H. T. COLEBROOKE.]

2739.

1351C. Foll. 49; size 11 in. by 5 in.; fairly good Devanāgarī writing; 9–12 lines in a page.

Śabdapradīpa, a dictionary of medical botany, by *Sureśvara*, or *Surapāla*, son of *Bhadreśvara*, grandson of *Yaśodhana*, and great-grandson of *Devagaṇa*.

The author was court physician to King *Bhīmapāla*, his father having acted in a similar capacity to *Rāmapāla* of Bengal, and his great-grandfather to king *Govindacandra*.

It begins:

भागीरथीतरलतुंगतरंगमौलिः
शश्वत्स्फुरच्छशिकलाममलां दधानः ।
लीलाचलच्छफरिकामिव चंद्रलेखा-
चूडामणिर्भवतु वो विजयाय नित्यं ॥

धीरः कविर्मधुरवाग् निरवद्यविद्या-
वैद्योत्तमो विमलकीर्तिलतावितानः ।
यो भीमपालनृपतेर्भिषगन्तरंगः
शब्दप्रदीपमकरोत् सुरपालनामा ॥

यः शब्दसूत्रनिचयैरिह वैद्यविद्या-
मोहांधकारभिदुरप्रतिमैकपात्रं ।
शब्दप्रदीपमयमारचयां चकार
स्नेहेन तं कृतधियः परिपालयध्वं ॥

अनेकवैद्यागमसंगतानि
शब्दाभिधानानि झटित्यवाप्तुं ।
शब्दप्रदीपो भवितायमेव
ध्वांतस्थितं द्रव्यमिव प्रदीपः ॥

एकार्थेद्व्यर्थवद्व्यर्था वक्तव्या नियमं विना ।
शब्दाः शब्दप्रदीपेन वैद्यशास्त्रानुगामिनः ॥

प्रथमांता द्वितीयांता निर्देश्या वाचका इह ।
वाच्यास्तु सप्तमीसिद्धा नियमो ऽयं समंततः ॥

ते पूर्वं वाचकाः शब्दा वाच्याश्च तदनंतरं ।
विरामः पूर्ववाच्यानां यावदन्यो हि वाचकः ॥

क्वचिन्निर्देशभेदेन लिंगनिर्देशतः क्वचित् ।
क्वचिद्विशेषणाख्यानाद्विद्यात् स्त्रीपुंनपुंसकं ॥

विज्ञेयो लिंगनिर्देशो वाच्यस्य पुरतो बुधैः ।
सप्तमीसिद्धरूपो वाथ वाचकरूपतः(!) ॥

बालाः सुखेन जानंतु यतोऽपभ्रंशसंज्ञया ।
अपभ्रंशानुरूपे च तस्माद्दोषो न संस्कृते ॥

अवङडञस्येर्वाग्रोंछेरादिगेरिह(!) ।
त्यक्तानि शब्दनामानि वैद्यशास्त्रेष्वसंभवात् ॥

आद्यवर्णैरकाराद्यैः क्षांतैरादिगतैः क्रमात् ।
यथासंभवमुच्यंते शब्दनामानि विस्तरात् ॥

इति सूत्रं ॥

अमृतं विभीतदुग्धांबुसुधासर्पिर्गुरूचिविषेषु च(!) ।
अमृता वाभयाकृष्णाधात्रीद्राक्षागुरूचिषु ॥

कीर्तिता अहिवाता(!) च शरण्यामंबुदो घने ।
तथा चांबुधरो मुस्ते घने च परिकीर्तितः ॥

अंबष्ठातिविषा पाठा कणा चांगेरियूथिषु(यष्टिषु [marg.) ।
अंबष्ठी माचिका च स्यात् यूथिका च प्रकीर्तिता ॥

अपथा(!) पन्नके शुंठ्यां पथ्याभिक्षुप्रियंगुषु ।
अक्षीवः शिग्रुसामुद्रनिंबवृक्षे तथार्कके ॥

अक्षिभेषजशब्दो नापुष्पका सीसलोध्रयोः ।
अकर्णविद्धं(!) जानीयात् पाठायामनृजुंनते(?) ॥

अरिष्टो निंबनिशाकतक्राशवरसोनके ।
वाद्यसीसकयोः क्लीबे भविष्यन्मृतुलक्षणे ॥

स्त्रीलिंगे च तथा नागवल्लीकटुकयोर्भवेत् ।
अरुणातिविषारक्तयष्टीश्रावणिकासु च ॥

त्रिवृतायां भवेत्पुंसि पुंक्लीबे चार्कपर्णके ।
अतिच्छत्रा शताह्वायां द्रोणपुष्प्यां च भूस्तृणे ॥

अवंतिसोमशब्दस्तु कीर्तितः पुंसि कांजिके ।
अज्जटा(*r.* अज्झटा) तामलक्यामनंतः पिप्पलपादपे
[(? पिप्पल°) ॥

अनंता सारिवादूर्वादंतीहैमवतीषु च ।
कर्थासुकां(!) दुरालंभागुरूचीलांगुलीषु च ॥

अञ्जं रसांजने पद्मे स्त्रियां शुक्तौ च पुंसि च ।
शंखसैवलमत्स्येषु वेतसे रजनीकरे ॥

अभ्रपुष्पस्तु वानीरे ऽलर्के मंदारके शुनि ।
अर्कश्च स्फटिके सूर्ये सूर्यावर्ते ऽर्कपर्णके ॥ °

The *svarādikāṇḍa* ends fol. 5*b*.

It ends: इति क्षकारादिवर्गः ॥
द्रव्यावलितिलेसेन(? विलासेन) व्यंजनादीनि यत्नतः ।
श्रीमान् सुरेश्वरो वैद्यविद्याविद्वानचीकरत् ॥
व्यंजनादिकाण्डः ॥
श्रीमद्गोविंदचंद्रस्य राज्ञो वैद्यगणाग्रणीः ।
करणांदयजः(? करणान्वयजः) श्रीमानभूद् देवगणः
[सुधीः ॥

तस्मादजायत सुधाकरकांतकीर्तिः
श्रीमान् यशोधन इति प्रथितस्तनूजः ।
तस्यात्मजः सकलवैद्यकसारवेत्ता
भद्रेश्वरः कविकदंबकचक्रवर्ती ॥

स्वैरं निजगुणोत्कर्षैः श्रीमद्वंगेश्वरस्य यः ।
राज्यं प्राप्यमलंचक्रे रामपालस्य भूपतेः ॥

तस्यात्मजः परमसज्जनकैरवेंदुः
श्रीमान् सुरेश्वर इति प्रथितः पृथिव्यां ।
पादीश्वरस्य भुजनिर्जितवीरवैरि-
श्रीभीमपालनृपतेर्भिषगंतरंगः ॥

सो ऽयं सुधासोदरवाग्विलासैर्
दाता शुचिः सत्यरतः क्षमावान् ।
वृद्धोपसेवी करुणार्द्रचित्तः
शब्दप्रदीपं कृतवान् मनीषी ॥

इति श्रीराजवैद्यान्तरंगश्रीसुरेश्वरविरचितं शब्दप्रदीपनाम-द्रव्याभिधानं समाप्तं ॥ संवत् १७२१ वर्षे पौषसुदिपंचमीसोमे ॥

Cf. Dietz, Anal. Med., p. 151.

[H. T. Colebrooke.]

2740.

1511e. Foll. 25 (173–197 of vol.); size 11½ in. by 9 in.; fair Devanāgarī writing (European paper, watermark 1801); ten lines in a page.

Paryāya-Ratnamālā, a synonymic vocabulary of medical terms, the name of whose compiler is not mentioned. Very incorrect.

It begins:

प्रणम्य परमं देवं दुःखत्रयहरं परं ।
संसारसागरोत्तारहेतुं सेतुमिवोत्थितं ॥
पर्यायरत्नमालेयमायुर्वेदार्णवोत्थिता ।
धार्या भिषग्विदा कण्ठा (*r.* कण्ठे) नातिसंक्षेपविस्तरा ॥
किं करोति नरः शूरः समरे शस्त्रवर्जितः ।
तद्वत्पर्यायरहितश्चिकित्सायां चिकित्सकः ॥
तेन नामानि रक्षामि (*r.* वक्ष्यामि) श्लोकेनार्धेन पादतः ।
श्रीपर्णी काश्मरी भद्रा गम्भारी (MS. °रि) गोप-
[भद्रिका ॥
कुमुदा च सदाभद्रा कट्फला कृष्णवृंतिका ॥
गम्भारि ॥
पाटलानि प्रिया स्थाली ताम्रपुष्पा फलेरुहा ।
कामदूती कुवेराक्षी कुतोयाद्रि[नि]वासिनी ॥
पाटली ॥ °

This vocabulary ends fol. 25*a* (197*a*):

असिद्धममृतं चामं पक्वं तु कथितं शृतं ।
आहारो ऽभ्यवहारश्च लंघनं चापतर्पणं ॥
करभः करलो (? *r.* कवलो) ग्रासो नस्यं नस्तं च
[लावनं (!) ।
ज्येष्ठांबुष्टतंचुलांबुः (!) स्यात् सुखोष्णस्तु (?) सुखोदकं ॥
इति चिकित्साशांगे (? सागरे) रत्नमालाध्यायः समाप्तः ॥

The remainder of the leaf contains a passage on weights and measures: अथ मानपरिभाषा । जालांतरगते भानोरनुव (!) दृश्यते रजः । °

Appended to the volume are three leaves containing an index to this treatise, separated therefrom by four leaves, marked अक्षर (? अक्षरावली), containing a list of synonyms of similar form, beginning दिव् । दिव । द्रुह । द्रुहण । द्रुहित । विरंचः । विरंचिः । ° and ending फलकृष्ण । कृष्णफल । फलपाक । पाकफल ॥

For another MS. of this work, in the colophon of which *Mādhavakara* is given as the author, see Rāj. Mitra, Notices, ix., p. 234; whilst in the description of yet another MS., ib. i., p. 111 (beginning in the same way but incomplete at the end), *Rājavallabha* is said to be the author as well as an alternative title of the work itself.

There is another *Paryāyaratnamālā*, by *Maheśvara Miśra*, of which a MS. is in the Bibl. Nat. of Paris (Gr. 24).

[H. T. Colebrooke.]

2741.

2621b. Foll. 16 (paged 1–32); size 4to, 10 in. by 7½ in.; written, on rough country paper, in the Telugu character; 22–27 lines in a page.

Abhidhāna-ratnamālā, or *Shaḍrasa-nighaṇṭu*, a dictionary of materia medica, in six chapters (*skandha*) corresponding to the different *rasas*. With Telugu explanations.

It begins: षड्रसनिघंटुः ॥

येन केनापि यद्वा यस्य कस्य चिदीरितं ।
नाम तत्र[त्] तदीयं स्यान्नमामि जगन्मयं ॥
सर्वतंत्रप्रयुक्तानि नामान्यादाय सर्वशः ।
रसभेदेन षट्स्कंधो निघंटुरभिधीयते ॥

तत्राद्यस्कंधः ॥

आज्य-क्षौद्र-तिलोद्व (!)-दुग्ध-नवनीतांभो-विदारी-वरी-
काकोली-कपिकच्छु-गोपतनया-मेदा-पयस्याद्वयं ।
खर्जूरी-तृणराण्-मधूकयुगलं पर्णीचतुष्कं कुशं
द्राक्षा-काशयुगं शितोपल-बला-दूर्वात्रयं गोक्षुरः ॥
चोचा-[ऽ]ङ्कोलक-वानरेष्ट-सुपवी-वारेक्षु-पारेवता
त्वक्षीरी (!)-पनस-द्विवृद्धि-कदली-जीवर्षभाश्मरत्ना ।
पद्मा-मस्तक-मुंजरि-क्षर-नली-खट्वा-द्रुर्वतुक्तदा
देवा खल्लिरुपोदकी-नट-मधूकं लक्ष्मणा शूलिनी ॥

कार्पासी-प्रियवत्यगस्त्य-मुषिकानंता-सतिंन्यच्छदा
[(? सतिग्य॰ comm.)
वत्सादन्यथ रक्तनाल-मधुरा-भूकंद-शृंगाटकाः ।
स्यौणेयं ककुभांड(कुकु॰ comm.)-मूत्रल-कलिंगालाबु-
[धामार्गव-
स्निग्धं हेम-मण्डूक-शिंबिज-घनस्कंधः खिल स्वादुभिः ॥
एषां क्रमेणाभिधानं वक्ष्यते ॥ ॰

I., *madhuradravyaskandha*, ends p. 7; II., *amladravya*, p. 9; III., *lavaṇadravya*, p. 10; IV., *tiktadravya*, p. 19; V., *kaṭudravya*, p. 24; VI., *kashāyadravya*, p. 32:

पत्रं दलं च च्छदनं पालाशं च दलं च तत् ।
शिंबी शमी स्यात्प्रागंतु(?) फलपुष्पोद्भवं स्मृतं ॥

॰ गिंज । बीजमस्यीति कथ्यते ॥ इत्यभिधानरत्नमालायां षष्ठ स्कंधः ॥

As Prof. Aufrecht has pointed out in the Cat. Cat., this work is quoted twice by *Mallinātha*, on *Śiśup.* i. 19, and xvi. 18. The half-verses referred to occur in the last *skandha*, viz.: जंबूः सुरभिपत्रा च राजजंबूर्महाफला p. 27, l. 3 infra; महापत्रो महाशाकः स्थिरकश्च हली मतः ॥ p. 29, l. 7 infra.

For other copies of this treatise see Burnell, Ind. Tanjore MSS., p. 72, no. lii.

A leaf (paged 33 and 34) attached to the above MS. contains: *Āyurvede Ashṭadhātuparīkshā*.

It begins:

अथातः संप्रवक्ष्यामि संक्षिप्तं सूक्ष्ममुत्तमं ।
आयुर्वेदोपदेशेस्मिं अष्टधातु निगद्यते ॥
नाड्याष्टौ पाणिवत्कंठनासोपांतसमाश्रितः(!) ।
पादयोर्हस्तयोर्घ्राणमूलयोः कंठमूलयोः ॥ ॰

[Mack. Coll.]

2742.

3248f. Foll. 27 (paged 37–90); size 4to, 9½ in. by 7¾ in.; rough country paper, Telugu character; 17–20 lines in a page.

Abhidhānaratnamālā, with the *Ashṭadhātuparīkshā*. [Mack. Coll.]

2743.

209. Foll. 154; size 11¼ in. by 4½ in.; fairly good Devanāgarī writing of about 1700 A.D.; eleven lines in a page.

Nighaṇṭurāja, also called *Rājanighaṇṭu* and *Abhidhānacūḍāmaṇi*, a dictionary of materia medica, by *Narahari* (*Narahara, Nṛihari*), son of *Īśvara*, a Brāhman of Kaśmīr. [A.]

It begins:

[यस्य निःश्वसितं वेदा यो वेदेभ्यो ऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थं महेश्वरं ॥ १ not in B ॥]
श्रीकंठाचलमेखलापरिणमत्कुंभींद्रबुद्ध्या रद-
प्रांतोज्जृंभितसंभृताब्दगलितैः शीतैरपां शीकरैः ।
निर्वाणे मदसंज्वरे प्रमुदितस्तेनातपत्रश्रियं
तन्वानेन निरन्तरं दिशतु वः श्रीविघ्नराजो मुदम् ॥ १ ॥

For a fuller account see Oxf. Cat., p. 323.

A lithographed edition of the work was published at Benares, in 1883. The 13th *varga*, treating of minerals, has been edited, with a German translation (Leipzig, 1882), by Dr. R. Garbe, according to whom the author wrote his work in the reign of King *Siṃhadeva Nṛisiṃha* of Kaśmīr, between 1235 and 1250 A.D.

[H. T. Colebrooke.]

2744.

1507a. Foll. 198; size 11½ in. by 4½ in.; good modern Devanāgarī writing; 9 or 10 lines in a page.

The same work. [B.]

This MS. is less correct than the preceding one; and is, moreover, slightly deficient at the end, breaking off abruptly, as it does, in the *tryarthāḥ* of the 13th (and last) *varga*.

[H. T. Colebrooke.]

2745.

795. Foll. 81; size 10½ in. by 5¼ in.; indifferent Devanāgarī writing of about 1750 A.D.; fourteen lines in a page.

Madanavinoda-Nighaṇṭu, a series of brief descriptions of medicinal plants, and articles of food, composed, in Saṃvat 1431 (1374 A.D.), by *Madanapāla*, of the *Ṭāka* family ruling at Kāshṭhā,* north of Delhi, on the *Yamunā*.

The work consists of 13 chapters (*varga*), to which this and other MSS. add a 14th, consisting of genealogical verses.

It begins:

> बीजं श्रुतीनां सुधनं (*a, b, c* सुखदं R. M.) मुनीनां
> बीजं गुणानां (जीवं जडानां *c*) महदादिकानां ।
> आग्नेयमस्त्रं भवपातकानां (भय R. M.)
> किंचिन्महः श्यामलमाश्रयामि ॥ १ ॥

Cf. Rāj. Mitra, Notices, ii., p. 264; and Prof. von Roth's account of the work and author in Weber's Indische Studien, xiv., p. 398 seqq.

A lithographed edition of the work has been published at Benares (1869, 2nd ed. 1875). The subjoined text of the genealogical verses referred to is based on the present MS. (*a*), and a copy from the (not very correct) Ben. edition (*b*) very kindly sent me by Prof. von Roth, together with collations of a MS. (*c*) in his possession, and another (*d*) in the University Library at Tübingen.

> टाकान्वये (टी० *d*, ? *a*, ठी० *b*) महति भूमिभुजां विशुद्धे
> काष्ठेति[1] नाम नगरं जयति प्रसिद्धम् ।
> यद्वेधसा विहितमादरतः स्वसृष्टेर्
> उत्कृष्टतातिशयपुञ्जदिदृक्षयेव ॥ १ ॥
>
> तत्र श्रीरत्नपालः समजनि जनतानन्दवृन्दैककन्दः
> कुन्देन्दुस्वच्छकीर्तिः परमददलनो दानदीक्षैकदक्षः ।
> यस्याकर्ण्य प्रभूतं प्रथितगुणगणं कर्णसाफल्यभाजो
> दैवं निन्दन्ति लोका (लोके *c*) नयनविफलताखेदमावेदयन्तः ॥ २ ॥
>
> जननयनसुधांशुस्तस्य शुद्धस्तनूजो
> जगति भरहपालः क्षोणिपालो बभूव ।
> सकलसफलवाञ्छासिद्धिहेतोर्विधाता
> सुरतरुमिह[2] चक्रे यत्करच्छद्मनेव ॥ ३ ॥
>
> हरिश्चन्द्रस्तस्मात्समजनि जनानन्दजननो
> हरिश्चन्द्रो लोके [ऽ]पर इव परीतापदलनः[3] ।
> परं विश्वामित्रेष्वहितमयमाधत्त मतिमान्
> वसिष्ठो[4] नैतस्माज्जगति महितो ऽन्यः सुकृतिनः ॥ ४ ॥
>
> तस्मादभूदद्भुतकृत्यमान्यः
> साधारणो भूमिपतिर्वदान्यः ।
> दारिद्र्यमुन्मूल्य पुनः (यतः *a*, युतः *d*) स्ववैरि-
> ण्यस्यापि कामं कृपयेव येन[5] ॥ ५ ॥
>
> कामं सर्वमहेशमान्य उदयो नास्तं[6] प्रयातः क्वचिन्
> नो दानं मधुपप्रियं जनमनःसंतापनुत्सूरता[7] ।
> सच्चक्रातिविचित्रमित्रसुखिता[8] वृद्धिप्रदा चन्द्रता[9]
> चातुर्येण महेन्द्रता कविमता किं किं न[10] यस्याद्भुतम् ॥ ६ ॥
>
> अजनि सहजपालस्तस्य पूर्वस्तनूजः
> सकलगुणनिधानं शास्त्रधर्मैकवेत्ता ।
> प्रथितपुरुषरत्नं यं समालोक्य लोका[11]
> बहुविधिषु विधातुः कान्ततां मन्वते स्म[12] ॥ ७ ॥

* These names are somewhat doubtful. The present MS. calls the family-name *kāṭānvaya* (or *kīṭānvaya*), but two marks (? figures) over the first two syllables seem to indicate that these syllables (or the consonants) are to be transposed. Other variants of the name are *ṭīka, ṭhīka, śāka*. The city in which this princely race resided is called in the present MS. *kāṇḍā*, whilst other MSS. read *kāshṭhā*, or (the prakritized form of this) *kāṭhā*, and the Ben. ed. *kāchā*. Some scholars make *Hariścandra* the father of *Madanapāla* (and his elder brother *Sahajapāla*); but there can be no doubt that in the genealogical account found in similar terms in several of the works patronized by *Madanapāla* (cf. Aufrecht, Oxf. Cat., nos. 651–53; and above, no. 2720), the verse तस्मात्मजो ऽभूदतुलप्रतापः साधारणो भूमिपतिर्वदान्यः ० must contain the name of another prince who ruled between *Hariścandra* and *Sahajapāla*.

[1] काष्टेति *d*, काछेति *b*, काठेति *c*, काडेति *a*.

[2] सुरतरुरिह *c*, ० तरुवर *b*, *a* om. from सफल to जनानन्द.

[3] परद्रुव० *b d*, परितापज्वलनः *a b*.

[4] विशिष्टो *c*, ०मानिशिष्टो *b*.

[5] स्ववैरिस्वस्यापि० कृपयेव० *b*, क्रियते च यत्नं ॥ *d*.

[6] कामः *a b c d*, धर्ममहेश० *b*, ०मान्यनुदयनास्तं *a*, ०नाशं *c*, मान्यमुदयो नाशः *d*.

[7] ०नुत्सूरता *d*, तन ०रुत्सूरता *b*, ० नुत्सारतः *a*.

[8] ०चित्रमत्र सुखिनां *c*, सच्चक्रीति० मंत्रसुखिना *d*.

[9] चंद्रदा *b*, नृंहता *c*, नंदता *d*.

[10] किंचिन्न *b*. [11] लोको *c*. [12] मन्यते स्म *a, b, c*.

किं वर्ण्यते श्रीसहजेन्द्ररूपं
लोकाक्षिनीलोत्पलपूर्णचन्द्रम्[13]।
सदा रतिः(रतः a) श्रीमदनो ऽपि यस्य
सहोदरत्वेन कनिष्ठ एव ॥ ८ ॥

जयति मदनपालः सर्वविद्याविशालः
सुजनपिकरसालस्तुष्टगोपालबालः।
रुचिरतरचरित्रश्चारुचातुर्यचित्रः(°चित्तः c)
कृतसरसिजमित्रः कर्मधर्मैः(°धर्मे c) पवित्रः ॥ ९ ॥

सदा यदीया गुणरत्नमाला
कराठेष्वतो वात्र(कंठेषु a, कंठोष्टकंठेषु d) सतां लुठन्ती।
अस्यैव शोभामधिकां विधत्ते
लोके चरित्रं महतां विचित्रम्[14] ॥ १० ॥

निन्दन्तः सेतुभेदं[15] जलनिधिविषये शीततां शीतशैले[16]
कैलाशे गम्यभावं विषधरभवने सर्ववासं[17] सदर्पम्।
यस्योदग्रप्रतापज्वलनकवलनाद्वैरिणो चक्रभाजो[18]
रक्षन्ति स्वं तृणेनाकुलितमतिहृदश्चित्रमेतच्चरित्रम्[19] ॥
[११ ॥

यत्कीर्तिर्मुदमादधाति गुणिनां कराठेषु लग्ना परं[20]
क्षिप्येव भ्रमणं करोति भुवनेष्वेकाकिनी[21] स्वेच्छया।
भूपानां नरिनर्त्ति संसदि सदा सर्वाङ्गसंदर्शिनी[22]
लोके सा विदिता तथाप्यतिसती[23] पुराण्यैर्यैः[23]
[प्राप्यते ॥ १२ ॥
तेन श्रीमदनेन्द्रेण निघण्टुरयमद्भुतः[24]।
कृतः सुकृतिनां लोके हिताय महतात्मना[25] ॥ १३ ॥

अब्दे ब्रह्मजगद्युगेन्दुगणिते[26] श्रीविक्रमार्कप्रभोर्
माघे मासि दलक्षपक्षललिते षष्ठ्यां सुधांशोर्दिने।
दीनानां परितापपापदलने ग्रन्थं निघण्टं किल[27]
श्रीदः श्रीमदनो व्यधत्त चतुरः सच्चक्रचूडामणिः ॥ १४ ॥

अनवद्यानि पद्यानि दश द्वादश वा[28] मया।
परेषामपि केषां चिल्लिखितानीह कौतुकात् ॥ १५ ॥
[वाचस्पतेः पितुरुदारसुवन्द्यविद्या-
वाचस्पतेश्चरणपङ्कजषट्पदेन।
वादीभपञ्चवदनेन कवीश्वरेण
साहाय्यमत्र समकारि गुणाकरेण ॥ १६ ॥ a]
यो राज्ञां मुखतिलकः कटारमल्लस्(कदार° a)
तेन श्रीमदननृपेण निर्मिते ऽत्र।
ग्रन्थे ऽभून्मदनविनोदनाम्नि पूर्णा
कर्णानाममृतरसप्रदा प्रशस्तिः[29] ॥ १७ ॥

इति श्रीमदनपालविरचिते मदनविनोदनिघण्टौ चतुर्दशो वर्गः समाप्तः ॥ [H. T. Colebrooke.]

2746.

42a. Foll. 111; size 9½ in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

Madanavinoda.

In this copy the work is preceded by a short passage (14 lines) in *bhāshā*: अथ वंगक्रिया लिख्यते। तेलपुट ७ तक्रपुट ७ अमलीपुट° ending अन-पान २३।

The MS. ends:

शुभ्रे हर्म्यतले शयीत शयने प्रत्यग्रपुष्पांचिते
वातैश्चंदनचंद्रचर्चित[त]नुः संस्पृश्यमानं सुखैः।
व्यायामं परिशोषिमैथुनरतिं मद्यं तथोष्णं रसान्
आग्नेयान्परितस्त्यजेन्मतिमतो वैद्यवाक्यैर्नरः ॥

[13] लोला° a, °रूप लो° चंद्रः d, b om. vv. 8–16.
[14] महतीह चित्रं d, विचित्रं महतां हि चित्रं a.
[15] निंदंतं सेतुभेदे d, भिंदंते सेतुबंधं c.
[16] °शैलैः a, °विषयं° शीतशैलं d.
[17] °भवनैः° a, °भुवने° d, सर्ववासं c.
[18] °ग्रं प्रतापं° कवलनाद्वै° c, °ज्वरबलकवलाद्वैरिणो चक्र° d, भाजा a, d.
[19] स्वं नृपेणा° c.
[20] यत्कीर्त्तिं मु° ददाति° d, °परी c.
[21] करोतु भवनेकेकाकिनी a, भुवनेभेकानि d.
[22] भूतानां परि° संपदि° सर्वाद्र° d.
[23] लोकाशा° तथा ध्यतिसती° a, °मती° d.
[24] निघंटोयं महाद्भु° c.
[25] सुकृतिना a, लोकहिताय d, महात्मनां c.
[26] ब्रह्मयुगे युगेंद्रगणिते d.
[27] परितापपाटनपटुर्ग्रंथो निघंटः कलः c, परितापपादपलतो ग्रंथं निघंटुं कलिख्यातं श्रीमदनो° d.
[28] पंच वा दश वा d.
[29] ग्रंथेस्मिन्° पूर्णो वर्गोयं गुणागुणमित्रमिश्रकोयं ॥ a (followed by the colophon); c has the *pāda* पूर्णोयं वर्गो ललितपदैः प्रशस्तिनामा चतुर्दशः ॥ १४ ॥ °

यो राज्ञां मुखतिलकः कटारमल्लस्तेन
श्रीमदनन्नृपेण निर्मिते ऽत्र ।
ग्रंथे ऽभून्मदनविनोदनाम्नि वर्गो
मिश्राख्यो ललितपदैस्त्रयोदशो ऽयं ॥

इति श्रीमदननृपेण निर्मिते मदनविनोदे निघंटौ मिश्रवर्गस्त्रयोदशमः ॥ १३ ॥

अजनि सहजपालस्तस्य पूर्वस्तनूजस्
तदनु मदनपालः पुत्ररत्नं बभूव ।
अकृतसुकृतभाजा येन राज्ञा निघंटुर्
भिषगभिमतसिद्धै कीर्तिसंदोहभाजा ॥

इति श्रीमदनविनोदनिघंटुः समाप्तिमगमत् ॥

Cf. Dietz, Anal. Med., p. 139.

[H. T. Colebrooke.]

2747.

2038a. Foll. 154; size 13¼ in. by 4 in.; fair Devanāgarī writing of 1811 A.D.; seven lines in a page.

Madanavinoda.

After the introductory verses, this MS. presents so many and considerable variations as almost to amount to a new work. The author's name and the title of the work are, however, so persistently repeated in the colophons of the chapters—of which there are seventeen in this version—as to leave no doubt as to the identity of the work; whilst the title *Dravyaguṇanāma*, under which it figures in the old Catalogue and in Dietz' Anal. Med., p. 156, originated in the leaf-mark द्रव्यनामगुण on fol. 1, and द्र॰ना॰गु॰ or द्र॰ना॰ on the others, merely intended to describe its contents, and repeated in the copyist's final verse.

It ends: इति दिनचर्या ॥ इति श्रीमदनपालविरचिते मदनविनोदनाम्नि ग्रंथे निघण्टौ सप्तदशवर्गः समाप्तः ॥

शाके ऽग्नि च भूधरेन्दुप्रमिते मासे तथा श्रावणे
दिक्संख्ये च तिथौ तथापि शशिजे वारे त्विदं पुस्तकं।
आलेख्यं खलु लेखकेन सुतरां द्रव्यं च नाम(!)गुणं
शोध्यं साधुजनैर्विचार्य शकलं विज्ञप्तिरेषा मम ॥

[F. Buchanan.]

2748.

1240. Foll. 60 (numbered 61, no. 53 being passed over); size 11 in. by 4¼ in.; fairly good Devanāgarī writing of about 1770 A.D.; 12–18 lines in a page.

Pathyāpathyavibodhaka(-Nighaṇṭu), a treatise on materia medica, in 6 chapters (*varga*), by *Kaiyadeva* (*Keyadeva, Kaiñdeva*) *Paṇḍita*, son of *Sāraṅga*, and grandson of *Padmanābha*, of the *Bhāradvājagotra*.

It begins:

नत्वैकं विश्वरूपं त्रिभुवनशरणं स्वर्गमोक्षैकहेतुं
शंभुं वाग्देवतां च व्यवहरति यया विश्वमेतन्नितांतं ।
यस्य ध्यानप्रसादात्प्रभवति पुरुषः सर्वकार्यार्थसिद्धिं
कर्तुं तं देववंद्यं स्फुरदुरगवरस्फारभासं गणेशं ॥ १ ॥
भारद्वाजपवित्रगोत्रतिलकः श्रीपद्मनाभो ऽभवद्
वेदव्याकृतिनाटकागमकथालंकारपारंगमः ।
तत्पुत्रो गुणभूषितः समभवत् सारंगनामा द्विजो[1]
येन प्राणिगदो ऽगदैरपहृतो ऽसौ सर्वविद्यालयः ॥ २ ॥
तत्पुत्रः कैयदेवो[2] ऽस्ति वैद्यविद्याविशारदः ।
नामरत्नाकरो येन कृतो ऽन्यो नामसागरः ॥ ३ ॥
नामरत्नाकरोक्तानां द्रव्याणां च रसादिषु ।
ग्रंथो ऽयं क्रियते तेन पथ्यापथ्यविबोधकः ॥ ४ ॥
इहौषधीधातुधान्यद्रवपक्कान्नमांसगः ।
स विहारो ऽथ मिश्रश्च नानार्थो नवमः(!)स्मृतः ॥ ५ ॥

Varga 1 ends fol. 38*b*; 2. fol. 41*b*; 3. fol. 43*b*; 4. fol. 52*b*; 5. fol. 56*b*; 6. fol. 61*b*.

It ends:

छिन्नाद्रिकानां द्रव्याणां रसवीर्यादयः कृताः ।
सूरिणा कैड्देवेन यथाशास्त्रानुसारतः ॥

इति श्रीवैद्यकैड्देवपंडितविरचिते पथ्यापथ्यविबोधके मांसवर्गः समाप्तः ॥

Cf. Weber, Berl. Cat., no. 1748; Rāj. Mitra, Notices, vi., p. 126; Dietz, Anal. Med., p. 143.

[H. T. Colebrooke.]

---

[1] श्रीशार्ङ्गनामा द्विजो Web., श्रीशार्ङ्गनामा भिषग् R.M.

[2] केयदेवो W., R. M.

2749, 2750.

1214, 1215. Foll. 1–231 and 232–520; size 11½ in. by 9 in.; fair Devanāgarī writing.

An alphabetical index to *Nighaṇṭurāja*, *Pathyāpathyavivekanighaṇṭu*, *Madanavinoda*, and *Nārāyaṇadāsa's Dravyaguṇa*.

It was probably compiled under Colebrooke's directions, and afterwards copied for Wilson; its beginning being identical with that of the Oxford MS. no. 766.

The MS. ends: इति राजनिघंटनामानि पथ्यापथ्यविवेकनिघंटं मदनविनोदनिघंटं च दृष्ट्वा पृथक्कृतानि गुणाश्चौषधादीनां द्रव्याणां नारायणदासकृतद्रव्यगुणमपि दृष्ट्वा लिखिताः शुभमस्तु सर्वजगताम् ॥

Cf. Dietz, Anal. Med., pp. 126, 137.

[H. T. Colebrooke.]

2751.

96b. Foll. 130; size 10 in. by 4 in.; indifferent Devanāgarī writing of 1674 A.D.; nine lines in a page.

Guṇaratnamālā, a compendium of materia medica and dietetics, in 26 chapters (*varga*), by *Miśra Bhāva*, son of *Miśra Laṭakana*.

It begins:

सिद्धिप्रदं विघ्नराजं विष्णुब्रह्मानंदं गुरुं ।
इष्टदं देवतामिष्टां वंदे ऽहं साध्यसिद्धये ॥ १ ॥
परमोपयोगिकतिचिद्द्रव्याणां भावमिश्रेण ।
संगृह्यते स्वभावो नानामुनिभिः समाख्यातः ॥ २ ॥
वक्ष्यते दिनचर्यादिदृष्टार्था मुनिभाषिता ।
तथा रजनिचर्या च चर्या च षड्ऋतूचिता ॥ ३ ॥
राज्ञां सविज्ञासु सभासु शोभां
निजां समीहेत चिकित्सको यः ।
श्रीभावमिश्रग्रथितां स एतां
दधातु कंठे गुणरत्नमालां ॥ ४ ॥
द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च ।
संबेन (r. संबंधेन) क्रमादेताः पंचावस्थाः प्रकीर्तिताः ॥५॥
क्वचिद्रसो गुणः क्वापि वीर्यं पाकः क्वचित्क्वचित् ।
क्वचित्प्रभावः स्वं कर्म द्रव्यस्य विदधाति हि ॥ ६ ॥
अत्रादौ रसादिवर्गः ॥ तत्रादौ रसाः ।
मधुरो ऽम्लः पटुश्चैव कटुतिक्तकषायकाः ।
इत्येते षड्रसाः ख्याता नानाद्रव्यसमन्विताः ॥

It ends: तत्र मधुररसगुणाः ।° इति वातादिवर्गः षड्विंशतितमः ॥

यावद्व्योमनि विंबमंबरमणेरिन्दोश्च विद्योतते
यावत्सप्त पयोधयः सगिरयस्तिष्ठंति पृष्ठे भुवः ।
यावच्चावनिमंडलं फणिपतेरास्ते फणामंडले (? फणामंडले)
तावत्सद्भिषजां मुखेषु वसतादस्माकमेषा कृतिः ॥ १ ॥

इति श्रीमन्मिश्रलटकनतनयश्रीमन्मिश्रभावविरचिता(यां) गुणरत्नमाला संपूर्णा ॥

संवत् १७३१ वर्षे मार्गशिर शुदि १० शुक्रवारे महन्नमध्ये(?) लिपीकृतं । श्रीनवरंगसाहराज्ये पुष्करणभागचंद तत्पुत्र नंदीदाश तत्पुत्र रामजी तत्पुत्रलिपीकृतं नंतरायगोत्रबलध दौलतपुरस्थानात् लिपीकृतं ।

Fol. 130*a* contains an index of the *vargas*.

Cf. Dietz, Anal. Med., p. 136.

[H. T. Colebrooke.]

2752.

2621a. Foll. 15 (paged 1–29); size 4to, 10 in. by 7½ in.; written on rough country paper, in the Telugu character; 26–29 lines in a page.

Śataślokī, a manual of materia medica (by *Avadhāna Sarasvatī*), with Telugu (and occasionally Sanskrit) explanations.

The text begins: शतश्लोकी ॥ सर्वज्वरस्य ॥

मुस्ता-पर्पट-धन्वयाष-धनिका-भूनिंब-विश्वामृता
मृद्वीका-दशमूल-निंब-सहदेव्यारग्वध-व्याधयः ।
सेव्यांभः-सुनिषण्ण-चंदन-बला-पाठा-वरी-शारिबा-
खर्जूर-त्रिफला-मधूक-मधुकाश्वाश्वत्थजं वल्कलं ॥
रास्ना-निर्जरदारु-चव्य-चपलामूलानि मूर्वोत्पलं
मंजिष्ठा-कण-वेणुपत्रि-कटुका-भार्गी-पटोलानि च ।
स्तन्य-क्षोणिभुजंग-पुष्पलतिका-रुद्राक्ष-गोरोचना
वाशा-केरजलाबु-वत्सक-सिता सर्वान्निहंति ज्वरान् ॥

टीका ॥ मुस्ता తుంగముస్తలు ।°

The MS. is incomplete, breaking off as it does at the end of *śloka* 84.

According to a Madras edition (1880), the work consists of 118½ verses, ending:

इमं समस्तरोगाणां प्रशस्तौषधसंग्रहं ।
अकार्षीद् बालबोधार्थमवधानसरस्वती ॥

Cf. Burnell, Tanjore MSS., p. 67*a*.

[Mack. Coll.]

2753.

1195a. Foll. 38; size 12½ in. by 5½ in.; indifferent Devanāgarī writing of 1743 A.D.; 13–15 lines in a page.

Yogacandrikā, a treatise on materia medica, in 38 chapters, by *Lakshmaṇa Paṇḍita*, son of *Datta*.

The author studied medicine at Benares under the tuition of two brothers, *Nāgeśa* (*Nāganātha*) and *Nārāyaṇa*, and had three elder brothers, *Gaṇeśa*, *Raghunātha*, and *Rāma*, and a younger brother, *Viṭṭhala*.

It begins:

विश्वोत्पत्तिस्थानसंहारहेतुं
जेतुं देवैरादिदैत्यान् स्मृतं तं ।
संदिग्धार्थोदन्वदुत्तारनावं
देवं प्रत्यूहाटवीदावमीडे ॥ १ ॥

कृतं यदीयं सुकृतं वदंति
चेतावितानेऽपि यमाहुरग्र्यं ।
जिज्ञासुः स द्वापरहृत्कलिघ्नं
तं दत्तसंज्ञं पितरं नतोऽस्मि ॥ २ ॥

पूर्वागुराम्नायकृतां दिदृक्षा
यदीक्षणेनैव कृतावसानं(?) ।
विचक्षणानां बुधनागनाथ-
नारायणौ तावहमानतोऽस्मि ॥ ३ ॥

विविच्य हारीतपराशरादीन्
तंत्रप्रकीर्णानतिसिद्धियोगान् ।
मुदे ऽगदंकारचयस्य तेषां
सुसंग्रहं लक्ष्मण आतनोति ॥ ४ ॥

पुराणतंत्रविस्तरादगम्यमर्थसंचयं ।
प्रकाशयिष्यति क्षणादियं हि योगचंद्रिका ॥ ५ ॥

The colophons run thus:

अतिगूढविधिप्रकाशिकायामगदंकारचकोरतोषिकायां ।
बुधलक्ष्मणनिर्मितौ (ज्वरघ्ना उपचारा इति) योगचंद्रि-
[कायां ॥

It ends:

विशिष्टतरशिष्टसंसदवतंसनागेशतस्
तथा तदनुजादतिप्रथितविद्यनारायणात् ।
अधीतचरकादिकः परिलसत्पयोवाहिनी-
पवित्रितनरे पुरे महति यस्तु देवालये ॥ १ ॥

स दत्ततनुजो गणेशरघुनाथरामानुजो
ऽग्रजः सुमतिविट्ठलात्परमतत्त्ववित्संततौ ।
शरन्निशि समुद्यतो हरिदिशीव शीतद्युतिः
सुधीरकृत चंद्रिकामतुलमातुलानुग्रहात् ॥ २ ॥

चिरं चरकसुश्रुतादिरचितानि तंत्राणि यद्
विभाव्य नियतं ततो ऽर्थमतिदुर्ग्रहं विस्तरात् ।
वि[विच्य सुखसंग्रहं] रचयतो महायास इ-
त्यदभ्रमतिसंभृतस्य गुणगृह्यतास्तामपि (?) ॥ ३ ॥

इति श्रीमद्ब्रह्मज्ञानिवंशावतंसदत्तसुतश्रीलक्ष्मणपंडितवि-रचिता योग[चंद्रिका समाप्ति]मगमत्॥ संवत् १८०० वैशाख ३ भ। मंदवासरे गणेशपंडितेन लिखितो ग्रंथः श्रीअजीतसिंहराज्ये रीवीग्रामे स्वार्थं परार्थं च ॥ १२९६ ॥

The title of the work in the colophon, being partly eaten away, has been supplied by a later hand as योगीरुयां, whence Colebrooke's *Paṇḍit* calls the work *Yogataraṅgiṇī* on fol. 1*a*.

Cf. Rāj. Mitra, Notices, i., p. 96; Dietz, Anal. Med., p. 149. [H. T. Colebrooke.]

2754.

1540a. Foll. 67; size 10½ in. by 4 in.; legibly written in Devanāgarī, by one *Lambodara*, in Saṃvat 1733 (A.D. 1676); twelve lines in a page.

The same work. Cf. Dietz, Anal. Med., p. 138. [H. T. Colebrooke.]

2755.

2357a. Foll. 38; size 10¼ in. by 4¼ in.; fair Devanāgarī writing of 1573 A.D.; thirteen lines in a page.

Yogaratnāvalī, a treatise on materia medica, in twelve chapters, by *Gaṅgādhara*, son of *Dāsa*(?).

Cf. Dietz, Anal. Med., p. 153.

It begins:

पायाद्वो ऽय करोतु कामदहनाज्जातो महांश्च श्रियं
पीनोत्तुंगमनोहरातिरसिकारामाविलासैर्वृतां ।
निष्प्रत्यूहमुपास्महे गणवृतावीरो(?) भवानीभवा-
वन्यः कोपि कृपालुरीदृशतमो विष्णुर्यया मातरं ॥ १ ॥
सच्छास्त्रार्थविशारदो ऽतिचतुरो नत्वा गिरीशं मुदा
कुर्वे वै नरकूपकामकरणी दासात्मजो ऽयं द्विजः ।
देवानामधिपं सुरेशनमितं श्रीशैलजावल्लभं
योगश्रेणिसमन्वितातिचतुरां रत्नावलीमद्भुतां ॥ २ ॥
वृन्नं विशालैः सुरसुंदरीणां
नत्वा रमेशं म◡शामनोन्यं(? मनसा मनोज्ञं) ।
रत्नावलीं योगयुतां सुरूपां
गंगाधरो ऽयं प्रकरोति सिद्धै ॥ ३ ॥
सूताभ्रगंधकशिलाहरितालशंखे
वैक्रांतमौक्तिकशिलाजितुहिंगुलानां ।
प्रवालतुच्छकवराटकमर्पराणां (? शर्वराणां)
वीक्ष्ये विधानमभिधानुसमं(?) हि चैषां ॥ ४ ॥०

I. (3*a*) *rasādiguṇavarṇana;* II. (5*a*) *aushadhīnāṃ guṇavarṇanam;* III. (7*a*) *rasadhātumiśraguṇavarṇana;* IV. (10*b*) *rasarājasya śodhanam;* V. (13*b*) *dhātūnāṃ śodhanam;* VI. (19*b*) *rogāṇāṃ cikitsāvidhiḥ;* VII. (22*a*) *atīsārādīnāṃ vidhiḥ;* VIII. (24*b*) *rogarājādi;* IX. (28*a*) *kushṭhādividhi;* X. (30*a*) *pramehādividhi;* XI. (32*a*) *vājīkaraṇa;* XII. *kashāyaushadhīnāṃ yogādi.*

The colophon of the first chapter is followed by the date: संवत् १६३० अकबरमुगलराज्ये । श्रीअह्मदावादनगरे ॥

The MS. ends:

समर्थने सत्यमभूतिसौम्या(!)
क्रोधादिदोषैर्विनिवर्तितो ऽपि ।
शास्त्रार्थचारी विशदं च सौम्या
यतेंद्रियस्तत्परमार्थसिद्धिः ॥ ११५ ॥

इति योगरत्नावल्यां द्वादशमो ऽध्यायः ॥ १२ ॥० संवत् १६३० वर्षे श्रीअह्मदावादे । अश्विनमासे । कृष्णपंचमीगुरवासरे लिपितं । पं० सवजीलिखितं ॥०॥ [GAIKAWAR.]

2756.

2357b. Foll. 37; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; fairly good, clear Devanāgarī writing of 1651 A.D. (foll. 18–30, 34, 36, 37 by a second, fol. 35 by a third hand); 6–9 lines in a page.

Yogaśata, a manual of materia medica, in 102 verses, the author of which is not mentioned; with a commentary, *Yogaśatabhāshya*, by *Amitaprabha*.

Text and commentary begin:

कृत्स्नस्य तंत्रस्य गृहीतधाम्नश्चिकित्सिताद्विप्रसृतस्य दूरं ।
विदग्धवैद्यप्रतिपूजितस्य करिष्यते योगशतस्य बंधः ॥ १ ॥

अनेन प्रतिज्ञावाक्येना[युर्वे]दः प्रतिपादितः । तत्र च त्रितयं वक्तव्यं चिकित्सा निदानं लक्षणं चेति । मया योगशत[स्य] बंधः करिष्यते युज्यते । एभिरारोग्येणातुरा इति योगाः छिन्नोद्भावादिप्रभृतयः । तेषां शतं योगशतं तस्य संबंधः(!) संग्रहः एकत्राभिधानं करिष्यत इत्यर्थः । ०

The author of the treatise is repeatedly referred to by the commentator as the *ācārya*.

Only a quotation from *Caraka* (fol. 37*a*), and a few references to former commentaries are met with in the commentary, viz.: on *śl.* 23 (fol. 10*a*) नीपपाठे (for निंब) नीपा पूर्वेति करंजः । तदभावे कलंवा इति टीकांतरे प्रतीतः ॥; *śl.* 47 (fol. 15*a*) हंसत्र्जुनं शर्करयाभिफेनो नक्तांधतांगोसावकृता(!) इति पाठे (viz. for the last *pāda* दाहं च रागं च रुजं च हन्यात्) गोयकृता गोकालखंडेन । इति टीकांतरे ॥; and *śl.* 57 (fol. 17*b*, text वासानिंबपटोलपर्पटफलश्रीचव्यदार्व्यंबुदैः ॥) comm. पटोलपर्पटकौ प्रतीतौ । फलं केचित् मदनफलं । फलशब्देन मुद्गंति टीकांतरे । त्रिफला । श्रीवेष्टकं आवणद्रव्यं प्रसिद्धं ॥

The commentary ends: न विद्यते रोगो ऽस्य तत् अरोगं निर्विकारमित्यर्थः ॥ इति अमितप्रभवविरचितं(!) योगशतभाष्यं समाप्तं ॥ संव १७०८ ॥

The Berlin Cat., nos. 959-60, and Burnell, Tanjore MSS., p. 67*b*, ascribe the text of the *Yogaśata* to a *Vararuci;* whilst Berl. 961 contains the present commentary without, however, the author's name. In the Oxford MS.

(Aufr., Cat., no. 752) the author of the *Yoga-śata* is not mentioned. Cf. Dietz, Anal. Med., p. 155.

According to Prof. Bendall, Cat. of Sanskrit, Pali, and Prakrit Books in the British Museum (where two different editions of the *Yogaśata*, in the Sinhalese character, are mentioned) an examination of the two MSS. of the India Office has shown the Ceylon text to represent the older of the two known redactions, and to correspond with the text of the MSS. in all but the last two stanzas. [GAIKAWAR.]

2757.

2357c. Foll. 59; size 10¼ in. by 4½ in.; good (Jaina) Devanāgarī writing of about 1500 A.D.; fifteen lines in a page.

Yogaśata, with a commentary, *Yogaśataṭīkā*, by *Rūpanayana*.

It begins:

नमः कर्णोल्लसत्कांतिपुंजपल्लवशालिने ।
जगन्नगरनिर्माणपूर्णकुंभाय शंभवे ॥ १ ॥
चिरं जयंति हेरंबकपोलमदवीचयः ।
मज्जन्मधुकरव्यूहव्याहारमुखरश्रियः ॥ २ ॥
सारत्वात्सारदृष्टांतादल्पत्वादल्पमेधसां ।
उपयुक्तमिदं सूक्तमुभयेषां भविष्यते ॥ ३ ॥
योगायोगार्थतत्त्वज्ञैः प्रयुक्ताः स्वर्गदच्छिदः ।
तेषु टीकामतः कुर्मः संमतिः स्यात् सती यदि ॥ ४ ॥

इह हि° मनसि कृत्यं प्रतिजानीते। कृत्स्नस्य तंत्रस्य° ॥१॥ अनेन प्रतिज्ञावाक्येनायमायुर्वेदः प्रतिपादितः। तत्र च त्रितयं वक्तव्यं। चिकित्सा निदानं लक्षणं चेति। तत्त्रितयमप्यनेनाभिधीयमानमभिधेयलक्षणं संबंधमवबोधयति°

Of authorities quoted besides *Caraka*, *Vāgbhaṭa* (or *Vābhaṭa*, fol. 47*a*, l. 5 inf.), and *Suśruta*, we note the following: *Kāśyapa* (fol. 39*a*); *Jayasena* (fol. 6*b*); *Jaiǰjaṭa* or *Jejjaṭa* (foll. 5*b*, 24*b*, 27*a*, 34*a*, 39*a*); *Bhadrasonavāḥ* (? *Bhadraśaunakaḥ*: यदाह भद्रसोमवाः। जांतिसात्म्यं मूर्तं नृणां। संवर्धनं श्लेष्मणस्तु वातपित्तनिबर्हणं। ° fol. 25*a*); *Bheḍa* (foll. 5*b*, 46*a*, 49*a*); *Bhoja* (fol. 52*a*, *Vṛiddhabhoja*, fol. 27*a*); *Siddhasārakāra* (fol. 45*b*); *bhaṭṭāraka Hariścandra* (fol. 31*b*); *Hārīta* (foll. 10*a*, 33*b*).

None of the passages referred to in the preceding commentary occur in this; viz. *śl.* 23: नीपो धूलीकदंबकः; *śl.* 47 (46) last *pāda*, कंडूं च दाहं सरुजं च हन्यात् ॥; *śl.* 57 (56) text ° फलश्रीमुस्तदार्व्यंबुभिस्° ; comm. फलश्रीशब्देन विल्वशलादूनि विवक्षितानि। तेषामेव पर्यायांतरत्वादिति केचित् फलं त्रिफला। श्रीमुस्तमिति भेदेन व्याख्येयमित्यपरे।

It ends: तेन कृत्वा इत्थंभूतं जगदरोगं भवत्विति संबंधः॥ उपजातिवृत्तं ॥

इति रूपनयनकृता योगशतटीका समाप्ता ॥

वर्जयेत्तु दिवा स्वप्नं योषित्संगं बहूदकं ।
जल्पं शीतं निशा जाग्र्यं व्यायामं शोधनं तथा ॥१॥ °५॥
वार्त्ताकं चपलीटुं (?) च कंदशाकान् परित्यजेत् ॥

इति रोगिणः पथ्यविधिः ॥ °

Cf. Dietz, Anal. Med., p. 155.

The Berlin MS. 962 contains yet another commentary on the *Yogaśata*, by *Sūryasena* (*Pūrṇasena*, Cat. Cat.). [GAIKAWAR.]

2758.

1029. Foll. 59; size 11 in. by 5 in.; fairly good Devanāgarī writing of about 1750 A.D.; eleven lines in a page.

Rasendracintāmaṇi, a treatise on medicines gained from the mineral kingdom, and their applications in different maladies, by *Rāmacandra* of the *Guha* family.

It begins: इदानीं गुहसंभवः श्रीरामचंद्राह्वयो रसेंद्रचिंतामणिग्रंथमारभमाणस्°

For a fragment of this work, see above no. 2675.

Cf. Dietz, Anal. Med., p. 136. Berl. Cat., no. 967. Oxf. Cat., no. 762. Also printed at Calcutta in 1878. [H. T. COLEBROOKE.]

2759.

1875a. Foll. 13; size $11\frac{3}{4}$ in. by 5 in.; good, modern Devanāgarī writing; eleven lines in a page.

Rasamuktāvalī, a treatise on metals and their medicinal properties.

It begins:

गिरिजातनुजं प्रणम्य पूर्वं
गिरिजेशं किल वेधसं च भक्त्या ।
कमलेशमहं करोमि रम्यां
रसमुक्तावलिकां परोपकृत्यै ॥ १ ॥

अथ धातुप्रमाणं लिख्यते ॥

कनकतारकताम्रकतीक्ष्णक-
त्रपुभुजंगममारकमेव च ।
इति वदंत्यपि धातुगुणं बुधाः
सकलशास्त्रमते ऽप्यतिविस्तरात् ॥ २ ॥

अथ सुवर्णसंख्या लिख्यते ॥ ०

इति हेमभस्म । इति हेमविधिः ॥ fol. 2*b*; इति बालमृगांकविधिः fol. 3*b*; इति राजमृगांकविधिः fol. 4*a*; इति रूप्यविधिः fol. 4*b*; इति तारेश्वरविधिः fol. 5*a*; इति ताम्रविधिः fol. 6*a*; इति लोहविधिः fol. 7*a*; इति वंगेश्वरविधिः fol. 8*a*; इति नागेश्वरविधिः fol. 9*a*; इति ० सप्तधातूनां मारणं ॥ अथ धातुभिर्धातुमारणं । fol. 9*b*; इति नीलांजनशुद्धिः fol. 10*a*; इति तालकेश्वरविधिः fol. 11*b*, etc. It ends:

घननादरसान्विते च मल्लः
परिपाच्यः किल दोलकाख्ययंत्रे ।
शुभवह्निरपो दिनं च मंदं
परिदेयः परिजायते सुशुद्धः ॥

इति सोमलशुद्धिः ॥ इति रसमुक्तावली समाप्ता ॥ with the marginal note: शाके १७३१ शुक्ल आश्विनशु १ पुणे ग्रामे जयरामशास्त्रिणा क्रयक्रीतमिदं पुस्तकं ॥

[Dr. John Taylor.]

2760.

1898. Foll. 20; size 12 in. by 5 in.; modern Devanāgarī writing; eleven lines in a page.

Another treatise on the medicinal properties of metals, and the preparation of drugs therefrom, extracted mainly from the *Yogataraṅgiṇī.*

The original title योगतरंगिणी on fol. 1*a* has been scored out and उत्तंकदर्पण written over it, under which title the MS. has figured in the old lists.

It begins: अथ शीलाजित(*r.* शिलाजतु)करणं ॥ ० and five lines further on it proceeds:

अधुना धात्वादीनां लक्षणशोधनमारणगुणानाह । स्वर्णतारारतारारिण ० from here onwards most of the matter is taken from the "*dhātūpadhātūtpattiśodhanamāraṇakathaka-taraṅga*" of that work (MS. 1439, foll. 83–89).

It ends: इति क्षारकल्पनं ॥

Śārṅgadhara and the *Rasaratnākara* are quoted on fol. 16*b*.

The last page has the same marginal note as the last MS. [Dr. John Taylor.]

2761.

729. Foll. 80; size $12\frac{1}{2}$ in. by $6\frac{1}{4}$ in.; careless Devanāgarī writing of 1790 A.D.; 14 or 15 lines in a page.

Yogaratnāvalī, a treatise on quack medicines, and their supposed effect, by *paramaśaivācārya Śrīkaṇṭha Paṇḍita.* Very incorrect.

The metrical text is in some parts accompanied by explanations in *Bhāshā*, and some of the diagrams show Urdu letters.

It begins rather abrupt: श्रीधन्वन्तराय नमः ॥

पाषाणं पाहुमानं(? बाहुमानं च) शुभमादाय चूर्णयेत् ।
अतीव सूक्ष्मतां प्राप्ते पात्रे धार्यं ततः शुभे ॥
क्षीरेदारितरं(!) कृत्वा पंचमाहूत्य(!) बुद्धिमान् ।
तत्पंकजमसारेण संयुक्तं कारयेद्बुधः ॥ ०

इति फटकरणविधिः ॥

The combinations of letters, consonants (*varṇa*) and vowels (*svara*), into regularly formed groups (*varga*) have different designations such as *uttara, uttarottara, adhara, adharādhara, sammukta* and *asammukta, abhihita* and *anabhihita, abhighāṭita, āliṅgita, abhidhūmita, mṛita* and *jīvanasūcaka* (fol. 11*b*–12*b*).

It is difficult to see how the word *nīhāra*, which only occurs at the beginning and the end, and nowhere else, can have here its ordinary meanings of 'hoar-frost' or 'mist.' Perhaps it might rather have to be referred to the vernacular verb *nihār, nehār* in the sense of *σκοπεῖν*. A quotation of vernacular Bengalī certainly occurs on fol. 7.

[H. T. Colebrooke.]

3126.

1259b. Foll. 6; size 16¼ in. by 3½ in.; modern Bengalī handwriting; six lines in a page.

Cūḍāmaṇinirūpaṇam, or *Cūḍāmaṇikeralī*, a treatise on fortune-telling by means of dice(?).

It begins: ओं नमो महादेवाय॥ अथ चूडामणिनिरूपणं॥

ज्ञातप्रश्नाक्षरं ज्ञात्वा खचन्द्रेण प्रपूरयेत् ।
द्वादशाङ्केन संयोज्य बाणेनैव प्रपूरयेत् ॥
चतुःषष्ट्या तु संयोज्य सप्तभिर्विभजेत्ततः ।

एकेन जीवः द्वाभ्यां धातुः त्रिभिर्मूलं। चतुर्भिर्जीवाश्रितो जीवः। पञ्चभिर्जीवाश्रितो धातुः । षड्भिर्जीवाश्रितं मूलं । शून्येनापि जीवाश्रितं मूलं । हृतावशिष्टो यो ऽङ्कः तदेव मूलं । यत् हृतं तदेव मूलं ।

लब्धं मूले विनिक्षिप्य दिगङ्केनैव योजयेत् ॥
चतुर्भिश्च हृते शेषे जानीयाद् जीवभेदतः ।
द्विपदाश्चतुष्पदाश्चैव अपदाः पादसंकुलाः ॥

एकेन द्विपदः द्वाभ्यां चतुष्पदः त्रिभिरपदः । चतुर्भिः पादसंकुलाः । असंवादे सति एकं हेयं देयं वा । एवं सर्वत्र । द्विपदे चतुर्भेदाः । देवनृपक्षिराक्षसाः। पिण्डाङ्के एकं मिश्रयित्वा लब्धं मूले विनिक्षिप्य चतुर्भिर्हृत्वा । एकेन देवाः । द्वाभ्यां मनुष्याः । त्रिभिः पक्षिणः । चतुर्भी राक्षसाः । ०

अथ चतुष्पदनिरूपणं fol. 2*b*; अथापदनिरूपणं fol. 3*a*; अथ पक्षिनिरूपणं ib.; अथ राक्षसनिरूपणं ib.; अथ

जीवाश्रितनिरूपणं fol. 3*b*; अथ धातुनिरूपणं fol. 4*a*; अथ मूलनिरूपणं fol. 5*a*; अथ चौरनिरूपणं fol. 5*b*; अथ नामानयनं fol. 6*a*; इदानीं लाभप्रकरणं वक्ष्ये । ib.

It ends:

पूर्वकृतपिण्डाङ्कं अष्टभिर्गुणयेत् त्रिभिर्हरेत्। एकेन दिनसंख्या द्वाभ्यां माससंख्या शून्ये वत्सरसंख्या ॥

इति चूडामणिकेरली समाप्ता ॥

संदेहोच्छेदकृता गुरुणा यदि सरणेन समुपदिष्टः ।
ध्यात्वा हृदि सर्वज्ञं स्वैरं सर्वज्ञतां तदा तनुतां ॥

For a *Divyacūḍāmaṇi*, by *Keralācārya*, see Rāj. Mitra, Notices, i., p. 245.

[H. T. Colebrooke.]

3127, 3128.

448, 449. Foll. 179 (the first six of which are missing; with duplicate leaves 85, 100, 111, 177), and 202 (180–381); size 9½ in. by 3¾ in.; Devanāgarī writing (by 3 or 4 different hands) of 1787 A.D.; 10 or 11 lines in a page.

Ramalarahasya-Sārasaṃgraha, an extensive work on fortune-telling in all the relations of daily life, by *Bhayabhañjana Śarman*, son of *Bhībhañjana* (?). Rather incorrect.

The subject is treated in four sections (*prakaraṇa*) each of which is subdivided into chapters (*adhyāya*), viz.:—

I. 1. (? introductory on *ramalavidyā*) ends fol. 7*a* (foll. 1–6 being wanting); 2. *bindūnāṃ praśnaḥ*, fol. 8*a*; 3. *shoḍaśarūpiṇām utpattiḥ*, fol. 11*b*.

II. 1. *ramalajñādilakshaṇam*, fol. 16*a*; 2. *rūpiṇām prakṛitikramaḥ*, fol. 21*a*; 3. *avajada-krama* (letters *a, v, j, d*), fol. 22*b*; 4. *avadaha-krama*, fol. 24*a*; 5. *vajadahakrama*, fol. 26*b*; 6. *saṃkhyākrama*, fol. 38*a*; 7. *kheṭakrama*, fol. 41*b*; 8. *varṇakrama*, fol. 51*a*; 9. *griha-vicārāṃśa*, fol. 62*a*; 10. *grihāṇāṃ cintanam*, fol. 67*b*; 11. *grihāṇām sākshībhūtāni*, fol. 75*b*; 12. *ramalāvṛitti*, fol. 77*a*; 13. *rūpiṇāṃ nāma*, fol. 78*a*; 14. *rūpiṇāṃ cihnakathanam*, fol. 79*a*; 15. *rūpiṇām prakṛitiḥ*, fol. 82*a*; 16. *rūpiṇāṃ svarūpam*, fol. 86*b*; 17. *rūpiṇām nānāvidhika-thanam*, fol. 99*b*; 18. *rūpiṇām parasambandha-sthānasya vyākhyānam*, fol. 106*a*; 19. *rūpiṇāṃ dṛishṭijñānam*, fol. 108*a*; 20. *prashṭur mano-'bhiprāya-mūkapraśnakathanam*, fol. 124*a*; 21. *pratyekadeśīyānāṃ ramalācāryāṇāṃ sammatena praśnakathanam* (*varvaradeśīyānām-misira-hin-dūka-rūma-tarāvalūsa-aparapaścimadeśīyānām prakāraḥ*, 126–135), fol. 156*b*.

III. 1–12 *tanvādi-dvādaśabhāvakrameṇa pra-śnakathanavyākhyānam*; 1. (*prathamagṛihasya*) *tanusthānasya praśnakathanam*, fol. 163*a*; 2. (*dvitīyagṛihasya*) *dhanasthānasya pr.*, fol. 179*b*; 3. *tṛitīyagṛihasya praśnakathanam* (*bhrātrādī-nāṃ vicāraḥ*), fol. 185*b*; 4. (*pitur vicāraḥ*), fol. 211*b*; 5. (*santāna-vicāraḥ*), fol. 229*b*; 6. (*dāsī-dāsānucarāṇāṃ vicāraḥ*), fol. 254*a*; 7. (*strīṇāṃ vicāraḥ*), fol. 286*a*; 8. (*mṛityvādibhayasya vicāraḥ*), fol. 292*b*; 9. (*dūrataḥ pravāsasya vicāraḥ*), fol. 301*a*; 10. (*rājyasya vicāraḥ*), fol. 313*a*; 11. (*bhāgyodayādy-āśāyā vicāraḥ*), fol. 316*a*; 12. *dvādaśagṛihasya praśnakathanaṃ* (*dushṭānāṃ vicāraḥ*), fol. 322*b*.

IV. *Miśrakaprakaraṇam*, treating (? in two chapters) of *mushṭipraśnādikam*, and *caurādīnāṃ nāmotpādanam* (and other subjects).

The author frequently refers to the author of the *Ramalārṇava*.

The leaves are numbered consecutively up to 233, after which there are several portions with separate numeration, or not numbered at all.

It ends:

भारद्वाजकुलोद्भवो हि मतिमान् ख्यातः सदा कीर्तिमान्
शिष्याचारयुतः [◡◡] पुरद्विजस्तस्यात्मजो भक्तिमान् ।
शैवे मंत्रविधौ सदाशिवसुधीर्भीभञ्जनो नम्रधीः
सूनुस्तस्य महद्विलासगणिते शास्त्रे कृतातिश्रमः ॥ २६ ॥

प्रणवादिगुरोरंह्रिकञ्जे भ्रमररूपभृत् ।
परागगन्धालुरक्तो द्विजानां भक्तितत्परः ॥ २७ ॥

समामर्दनधातोश्च युक्तं पूर्वभयेति हि(!) ।
युद्धमयेत्वनादेशे शर्मणा रखेतल्लिखितम्(!) ॥२८॥ °२९॥

यत्कुत्रापि परिश्रमं(? r. °मो) यदि भवेत् पन्थे(? पक्षे)
[विशाले त्वहो

शब्द[ो] वापि मनोविकारवशतस्तच्छोध्यतां सादरात्।
ये शिष्टा हि परोपकारनिरताः स्वात्मावबोधास्तथा
विज्ञप्तिमिम सावधानमनसा तेषां तु पादांबुजे ॥ ३ ॥

इति श्रीभयभञ्जनशर्मकृतौ रमलरहस्ये सारसंग्रहे (thus always) मिश्रिकप्रकरणं समाप्तम् ॥ °

[H. T. COLEBROOKE.]

3129.

2256. Foll. 31; size 5 in. by $6\frac{3}{4}$ in. (European fashion); indifferent, modern Devanāgarī writing; 15–25 lines in a page.

Ramalajñāna, a treatise on geomancy. Incorrect.

It begins: ओं स्वस्ति श्रीगणेशाय नमः ॥ ओं नमो वाग्देव्यै ॥ ओं नमस्सूर्यादिनवग्रहेभ्यो । ओं

दशमतृतीये सौरा त्रिकोनेति वृहस्पतिः ।
चतुर्थाष्टमयौ भौमः पोशापष्यत्रिसप्तमौ(?) ॥

अथ फलानि लिख्यंते ॥ आत्मा प्रथमः । धनं द्वितीयः । भ्रातृस्थानं तृतीयं । पितृमित्रस्थानं ४ । सुतस्थानं ५ । शत्रुस्थानपरिजनद्विपदचतुष्पदाद्यपहारितवस्तुस्थानं ६ । भार्याविवाहप्रेषितस्थानं ७ । मृत्युमारपीडास्थानं ८ । प्रस्थानमंत्रतंत्रादिधर्मस्थानसुप्रस्थाः ९ । नृपामात्यकर्मस्थानं १० । आयुर्मित्रलाभस्थानं ११ । व्ययवैरिविनाशस्थानं १२ । पृच्छास्थानं १३ । अभिवाञ्छितस्थानं १४ । सर्वस्थानं १५ । शुभवस्तुदर्शनस्थानं १६ । इति षोडशस्थाने शुभाशुभग्रहा ज्ञातव्याः ॥ अथ शुभाशुभविचारः । °

The last seven leaves have been supplied by a different hand.

It ends fol. 30*a*: षोडशगृहेषु फलव्युत्पत्तिस्सम्पूर्णा ॥ इति रमलज्ञानं सम्पूर्णं समाप्तम् ॥ अथ रमलज्ञाने तपायः(!) । आदौ सुज्ञेया बिंदूनां चतुर्णां कुर्याच्छायाः(!) ° 20 lines, ending: पञ्चदश पुनः प्रथमाद्वा पञ्चदशादेकं कषणीयम् चेति कोष्टकः षोडश सम्पन्ना भवति । रमलज्ञानं समाप्तम् ॥

[R. JOHNSON.]

3130.

1519 a. Foll. 23 (and two additional leaves after foll. 8 and 10); size $10\frac{1}{2}$ in. by $4\frac{3}{4}$ in.; fairly good Devanāgarī writing, by two or three different hands, for the most part of about 1700 A.D.; eleven lines in a page.

Ramalenduprakāśa, another treatise on geomancy, in 16 chapters (*ullāsa*), apparently adapted from some Persian work, by *Tripāṭhin Rudramaṇi*, surnamed *Vālmīki Kavicakravartin*, son of *Gauḍatripāṭhin Bhagavat*.

The author would seem to have been born in 1658 A.D.; a *Rāmacaritram* having been written by him, besides the present work which was composed in his 25th or 26th year of age (A.D. 1683). [A.]

It begins: साम्बमवलम्बे ।

जेयाजेयान् जयति दितिजान् यत्प्रसादेन विष्णुर्
जिष्णुर्लोकानवति सकलान् यत्पदाब्जप्रसादात् ।
स्रष्टुः(? r. सृष्टेः) स्रष्टा हरति च हरः प्रान्तकाले च सांबा
विघ्नेशांबा हरतु दुरितं मे सुसिद्धिं विधत्ताम् ॥ १ ॥

गौडत्रिपाठभगवद्भगवत्सुतो ऽभूद्
वाल्मीकिनामविशदो विशदो गुणौघैः ।
वाल्मीकिनाममुनिवत्(वाल्मीकिवज्जगति यः B)
[कविचक्रवर्ती
श्रीमच्छिवाचरणलब्धवरप्रसादः(°सेवकपार्श्ववर्ती B)
[॥ २ ॥

प्राचि प्रागब्धिवेलां वरुणदिशि तथा पश्चिमां बोधिवेलां
याम्यायां याम्यशैलं तुहिनदिशि हिमं यावदन्यो न
[तादृक् ।
सर्वज्ञेंद्रो ऽस्ति तेन स्वगुणसमगुणः काव्यरत्नेन रुद्रः
श्रीमद्वाल्मीकिनाम्ना स्वजनिसमुदितेनेव दीपेन
[दीपः* ॥ ३ ॥

* A abbreviates this stanza, giving only प्राच्यीप्रागब्धिवेलेत्यादि ॥

ज्योतिर्विदां सुबोधाय रमलाम्भोधिसारतः ।
रमलेंदुप्रकाशो ऽयं शकलैस्तेन तन्यते ॥ ४ ॥

सन्मुहूर्तमहिते स्वहर्मुखे दुर्दिनादिरहिते दिने तथा ।
निश्यपि स्वमृतवाग्विभूषितः स्वेष्टदेवपदरम्यभूषितः ॥५॥

अथ प्रथमोल्लासो मन्त्रादिज्ञाने । °

The figures (शकल *i.e.* شکل) by means of which the art is practised, are 16 in number, the same as in the Turkish epitome of the art analyzed in Flügel's Catalog der Handschriften der K. K. Hofbibliothek zu Wien, ii., p. 585. They also have preserved their Arabic names, identically the same as those quoted from the رسالۀ رمل, with the exception of two or three. Instead of the ثابتة (12) and قلية (13) we find here an अतबे खारिज and an अतबे दाखिल, and the حيان (1) is altered to लह्यां (*i.e.* الحيان ?). Regarding the origin of these signs the author says: हज्रद्दानियालो [*i.e.* حضرت دانیال] दैवशाद्यवनधर्मपद्धतिमाचरिष्यमाणः पित्रा तर्जितो वनं प्राप्य हा कादिर् [*i.e.* یا قادر] इति शब्दमकरोत्तदा हजिरत जवईल [*i.e.* حضرت جبرائیل]समेत्य भूमौ विंदुं प्राकल्पयत् । एवं चतुर्वारसंगेन तरीक [طریق] संज्ञकशकलो जातः । अस्य ग्रंथस्य धूलौ निहतत्वाद्रमलसंज्ञा ॥

That this art is illustrated by many treatises amongst Muhammadans, we know from *Hājī Khalfah* (see Flügel's edition, iii. 478, 479), and that the present work is not the only attempt to introduce the subject to the Hindus is proved by the existence of several other works of this kind in MS., and of a *Ramalanavaratna* by *Paramasukhopādhyāya*, printed at Benares in 1869.

It ends: अथ वर्षाप्रश्ने ।

यद्यावीशकलानि कंटकगतान्यंबुस्थितान्येव वा
भूत्वा भूरिपदेषु वारि बहुलं कुर्वंति नो चेद्यदा ।
भूरिस्थानगतानि तानि लघुवर्षाकंटके चेच्चरास्
तूर्णं वारि शुभाश्च वारिति करं वैलोम्यतो नो जलं
[॥ २२ ॥

अथ भोजनप्रश्ने ।
चरद्व्यंगस्थिरे लग्ने भोजनं भूरि भूरिशः ।
गच्छतः संमुखे को ऽस्ति मिलित इति ।
स्त्रीपुंनपुंसकेऽग्ने स्त्रीपुंषंढाः संमुखे क्रमात् ॥ २३ ॥
अथ चौरप्रश्ने ।
विप्रो राजानुज्ञविट्(!) शूद्रः पामरः स्त्रीसुतानुजाः ।
लग्नखेटवशात्तेनवयोवर्णादिकं वदेत् ॥ २५ ॥
कोटभंगः केन मार्गेण भविष्यतीति प्रश्ने ।
निर्बलकेंद्रदिशा वै कोटविभंगाय कीर्तिता यवनैः ।
बहु बहुविस्तरभयतो न मया लिखितो ऽत्र बुद्धितो ज्ञेयं ॥
नवनगतिथि१५७९शकसमये जातो ऽयं [भास्करप्रमैरब्दैः ।
रामचरित्रं रचितं रचितो ऽयं तत्त्वसंज्ञकैरब्दैः ॥
पुत्रवतीत्यवनी विशदाभूद्येन सती भवतीह वसंती ।
तेन विधाय समर्पित ईशायाः पदयोरयमाचिरमास्तां ॥
इति श्रीत्रिपाठीरुद्रमणिकल्पितो रमलेंदुप्रकाशः संपूर्णः ॥
supplied in the margin].

[H. T. COLEBROOKE.]

3131.

2255. Foll. 36; size 5¼ in. by 7 in. (in European fashion); fair Devanāgarī writing of 1747 A.D.; nineteen lines in a page.

Ramalenduprakāśa. [B.]

This MS. ends thus: वर्षाप्रश्ने ।
यद्यावीशकला° (differing somewhat) जलं ॥
एवं वादीष्वगुजलं विश्रामप्रश्ने
चरादिष्वंगगेयूक्ता विश्रामा भूद्विवहयः ।
चरस्थिरद्विस्वभावा मेषाद्याः क्रमतो मुहुः ॥
अथ षोडश उल्लासः सुरतप्रश्ने ।
वृद्धास्तगे ऽर्के हिमगौ चराला (वृद्धास्त° वाला A)
बुधे कुमारी च गुरौ (हिमगौ A) प्रसूता ।
स्वरूपिणी (सुरूपिणीं A) दैत्यगुरौ स्वरूपा (सु° A)
शनौ कठोरा वधिरा च राहौ* ॥
गुणोज्झिता [भूमि]सुते ऽस्ति याते
सुतेजसा [स्या]तयशः – प्रसारा† ॥

* This is v. 15 in A.

† A has this half-verse after v. 15, it being followed by a complete *anushṭubh śloka*.

नवनगतिथिशकसमये जातो ऽहं भास्करप्रमैरब्दैः ।
रामचरित्रं रचितं रचितो ऽयं तन्नसंख्यैरब्दैः(!) ॥
पुत्रवतीत्यवनी विशदाभूद्येन सती भवतीह वसंती ।
तेन विधाय समर्पित ईशायाः पदयोरयमाचिरमास्ताम् ॥

इति श्रीरुद्रमणित्रिपाठिकल्पितो रमलेन्दुः संपूर्णः॥ विजयते जगदंबा ॥ संवत् १८०४ मार्गसुदि ६ गुरौ ० ॥

The revelation of the art is here ascribed to Adam first, then to Idrīs (Enoch), and only then to Daniel and Gabriel from whom MS. A starts. [R. Johnson.]

3132.

92 c. Foll. 24; size 10 in. by 4 in.; fairly written in Devanāgarī, towards the end of last century; twelve lines in a page.

Ramalapraśnasaṃgraha, another treatise on geomancy, by *daivajña Cintāmaṇi,* pupil of *Cūḍāmaṇi daivajña.*

It begins:

गजास्यं सिंदूरारुणितवदनं विघ्नदमनं
स्वकार्ये वृंदारैर्नमितचरणं शीर्षकमलैः ।
तथा देवीं वंदे सुजनसुखदात्रीं त्रिभुवने
द्युदीपं चक्रस्थं सकलदुरितौघार्दनमजम् ॥ १ ॥
विलोक्य यामलं शास्त्रं रमलप्रश्नसंग्रहं ।
चिंतामणिः करोत्येवं रमलोत्कर्षमद्भुतम् ॥ २ ॥

अथ पाशकशाधनं । °

It ends:

षष्ठे रोगयुतश्चैव सप्तमे स्त्रीयुतो भवेत् ।
एवं वर्षेषु खंडेषु पुनरुक्तं फलं वशात् ॥ [५]६८ ॥
तत्तत्स्थानभवं तेभ्यो रमले च विचक्षणैः ॥

इति श्रीचूडामणिदैवज्ञश्रीमन्महाराजपदांबुजशिष्यजनानंददायकसर्वविद्याकुशलसर्वशास्त्रेषु कृतश्रमचिंतामणिपंडितविरचिते ज्योतिःशास्त्रे रमले प्रष्णतंत्रं(प्रश्न°) संपूर्णं ॥

[H. T. Colebrooke.]

3133.

2345 c. Foll. 13; size 10 in. by 5¼ in.; indifferent Devanāgarī writing of 1753 A.D.; foll. 1*b* and 2*a* in a large sprawling hand, 17 lines in a page; the rest in a small hand, 13–25 lines in a page.

Ramalaśāstra, another treatise on geomancy, by *Rāma,* son of *Rāma Rudra* of the *Bharadvāja* family, and younger brother of *Kṛishṇa.*

It begins*: अथ रमलशास्त्रं लिख्यते ॥

वंदे तत्पदपंकजं गणपतेर्यद्वीक्ष्य रक्तांबुजं
गंडस्था भ्रमरावली मधुधिया भाति स्पृशंती मुहुः ।
मंजीरध्वनिदत्तचित्तजमहान्प्रोड्डीय किंचित्पदान्
मंजूलप्रतिशब्दितं विदधती सत्तांडवे कालिकां ॥ १ ॥
परं वरं तत्रगनाङ्गियुक्तं
न विघ्नमेघो दिवि चंद्रयुक्तः ।
अगारमाद्यं विजहाय भूमौ
करोति पद्यं नरगो(? तरणे) शिवं वः ॥ २ ॥
विलोक्य यावनं शास्त्रं† तद्व्याख्यातृगिरस्तथा ।
श्रुत्वा तनोमि विमलं रमलोत्कर्षमद्भुतं ॥ ३ ॥

अथ पाशकसाधनं ॥

सायने मेषगे सूर्ये पाशान् धातुमयान्कुरु ।
व्ययने तेषु शून्यानि कर्तव्यानि यथोदितं ॥ ४ ॥

It ends: इति रमलतंत्रे प्रश्नतंत्रं समाप्तं ॥

[त]त्वाद्वावादुगाहकं पंच सप्तमखंडकं ।
मुख्यभावफलं ज्ञेयमुवाह बलतोमितं ॥
नाजीरबलतो ज्ञेयमुगाहस्य बलाबलं ।
नाजीरोगाहयोः खंडयोगेन खंडकद्वयोः ॥
तस्मात्तत्खंडकं पाति तेन वाच्यं शुभाशुभं ।
विघ्नप्रथमयोः सूर्यशक्रयो१४श्च समागमयो(!) १५ । ७ ॥
नृपाशयो१६॥१०। योगजानि केंद्रखंडानि तानि वै ४ ।
तेभ्यः शुभाशुभं वाच्यं रमलेषु विपश्चिता ॥
षोडशशकलानां(!) शून्यानि गणयेत्सुधीः ।
त्रिगुणान्यङ्गिभक्तानि लघुंगणे भवेत्(!) ॥

---

* The top margin of the first page contains the verse गजास्यं सिन्दूरारुणितवदनं° for which see the preceding work.

† Here the gloss रमलप्रश्नसंग्रहं has been added in the margin, the sign = referring to it, being placed over तद्.

भारद्वाजकुलावतंसगणकश्रीरामरुद्राह्वयस्

तत्सूनुर्मतिमान्महद्विधिविदां श्रेष्ठस्तु कृष्णाभिधः(!in-

चक्रे रमलवैचित्र्यं बड्डं शकलषोडशैः। [complete)॥

दृष्ट्वा यवनशास्त्रोक्तं बड्डं गीर्वाणभाषया ॥

इति रामविरचितं रमलशास्त्रं समाप्तं ॥ संवत् १८७० आ० सु० १ रवौ ॥

For a fragment of the same, or a similar work (*Ramalagrantha Yavanokta*) see Aufrecht, Florentine MSS., p. 109. Neither verse 3 nor the last verse (which ought to be on fol. 5*a* of this MS.) of that fragment is found in our MS., whilst verse 4 is here verse 7.

[GAIKAWAR.]

3134.

1057 b. Foll. 2; size 15½ in. by 3 in.; folded half-length; careless, modern Bengali handwriting; five lines in a page.

Svapnādhyāya, a short treatise on oneiromancy.

It begins:

स्वप्नाध्यायं प्रवक्ष्यामि यथोक्तं मुनिभाषितं।
येन विज्ञानमात्रेण ज्ञायते च शुभाशुभं ॥
स्वप्नस्तु प्रथमे यामे फलं संवत्सरे लभेत्।
द्वितीये चाष्टभिर्मासैस्तृतीये च चतुर्थके ॥
चतुर्थे चार्धमासेन दृश्यते नात्र संशयः।
अरुणोदयवेलायां दशाहेन फलं लभेत् ॥
दुःस्वप्नं चापि सुस्वप्नं कथनादेव पश्यति।
वातिकं पैत्तिकं श्लैष्मं चिन्तितं परिवर्जयेत् ॥
आरोहणं गोवृषकुञ्जराणां
प्रासादशैलाग्रवनस्पतीनां।
आरुह्य नौकां प्रतिगृह्य वीणां(?)
भुक्त्वा रुदित्वा भुवमर्थलाभः ॥ १ ॥

There are 26, or, including the first four, not counted in the treatise, 30 verses.

It ends:

रक्तचन्दनकाष्ठानि घृतेनाग्नौ जुहोति यः।
गायत्रीशतसहस्रेण(!) तस्य शान्तिर्विधीयते ॥ २५ ॥
रामत्रयं त्रीणि पदानि विष्णोर्
अग्नित्रयं त्रीणि च पक्षाणि(*r.* पुष्कराणि)।
हरं त्रिनेत्रं त्रिपथां च गङ्गां
स्मरामि दुःस्वप्नविनाशनाय ॥ २६ ॥

इति स्वप्नाध्यायः समाप्तः ॥

Cf. Berl. Cat., no. 902; Oxf. Cat., no. 808.

[H. T. COLEBROOKE.]

3135.

890 b. Foll. 3; size 9¾ in. by 4 in.; good, modern Devanāgarī writing; nine lines in a page.

Svapnādhyāya, rather incorrect, and differing considerably from the last MS.

It begins:

स्वप्नाध्यायं प्रवक्ष्यामि यथोक्तं मुनिभिः पुरा।
एतद्विज्ञानमात्रेण स्वप्ने बोध्यं शुभाशुभं ॥ १ ॥
अब्देन प्रथमे यामे षण्मासैश्च द्वितीयके।
तृतीये तु त्रिभिर्मासैः स्वप्नस्य फलमाप्नुयात् ॥ २ ॥
चतुर्थे चार्धमासेन दृश्यते नात्र संशयः।
अरुणोदयवेलायां दशाहेन फलं लभेत् ॥ ३ ॥
अत ऊर्ध्वं प्रवक्ष्यामि शुभाशुभफलं शृणु।
आरोहणं गोवृषकुंजराणां०

It consists of 41 verses, ending thus:

आसने शयने याने त्वरिते वाहने गृहे।
पायमानो विबुध्येत तस्य श्रीः सर्वतोमुखी ॥ ३५ ॥
यस्तु मध्ये तडाकस्य भुंक्ते च दधिपायसं।
निर्मले पद्मपत्रे वा पार्थिवो नात्र संशयः ॥ ३६ ॥
द्विजगीर्वाणपितरो देवाः सिद्धादयस्तथा।
यदा ते न वरं स्वप्ने तकृथैव(? तद्वृथैव) भविष्यति ॥ ३७ ॥
क्रुद्धां च देवतां दृष्ट्वा क्रोशंतीं रुदतीं तथा।
प्रस्फोटयंतीं धावंतीं देशोरण्यं भविष्यति ॥ ३८ ॥
अग्नित्रयं त्रीणि च पुष्कराणि
रामत्रयं त्रीणि पदानि विष्णोः।
हरं त्रिनेत्रं त्रिपथां च गंगां
स्मरामि दुःस्वप्नविनाशनाय ॥ ३९ ॥

गंगां गंगाधरं गौरीं केशवं नंदिकेश्वरं ।
यः स्मरेत् प्रातरुत्थाय दुःस्वप्नं तस्य नश्यति ॥ ४० ॥
स्वप्नाध्यायमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
इशितं(? ईप्सितं) लभते लोके बृहस्पतिवचो यथा ॥ ४१ ॥
इति श्रीइतिहासपुराणे बृहस्पतिकृते स्वप्नाध्यायः समाप्तः ॥

[H. T. Colebrooke.]

3136.

2345 b. Foll. 29 (of which 8–12, 16, 17, 19, 20 are wanting); size 7½ in. by 4 in.; fairly good Devanāgarī writing of 1630 A.D.; 11–15 lines in a page.

Svapnacintāmaṇi, a Jaina(?) treatise on the interpretation of dreams, by *Jagaddeva*, son of *Durlabharāja*.

It begins:

कविभिः करकलितमिव त्रैलोक्यमिदं विलोक्यते सद्यः ।
आसाद्य यत्प्रसादं सा जयति सरस्वती देवी ॥ १ ॥
कृतिभिः(कविभिः eds.) कृतानि खंडोद्देशेन स्वप्न-[लक्षणान्यग्रे ।
तान्येकस्थानानि(r. ०स्थानि शुभा)शुभानि संक्षेपतो [वक्ष्ये ॥ २ ॥
धर्मरतः समधातुर्यः स्थिरचित्तो जितेंद्रियः(यतें० eds.) [सदयः ।
प्रायस्तस्य प्रार्थितमर्थं स्वप्नः प्रसाधयति ॥ ३ ॥
स्वप्नदिदा[ना]नि नवश्रुतमनुभूतं प्रदर्शमनुरूपं(प्रदर्शी-[नमनूपः eds.) ।
चिंताप्रकृतिविकारो दैवात्(दैवाः eds.) पुण्यानि [पापानि ॥ ४ ॥
आद्यं षड्‌ तेषां शिवमशिवं वापि निष्फलं तेषां(नि-[ष्फलं भवति eds.) ।
अंत्यं चिरं च तेषां(ज्ञेयं eds.) शुभाशुभं सूचयत्यचिरात् [(शुभाशुभं तच्च यच्छति त्वचिरात् eds.) ॥ ५ ॥
ज्ञेयः प्रज्ञेन(प्राज्ञेन eds.) दिवा दृष्टः कृतपरिचयस्ततो [(तथा eds.) ऽभिहितः ।
आधिव्याधिभवो वा माला स्वप्नस्य(स्वप्नो ऽपि eds.) [फलविहीनः ॥ ६ ॥
अतिहास(रतिहास eds.)शोककोपोत्साह[जुगुप्सा]भ-[याद्भुतोत्पन्नः ।
चिंताक्षुधापिपासामूत्रपुरीषोद्भवः(वितथः क्षुधा० eds.) [स्वप्नः ॥ ७ ॥

It ends:

किं बहुना शुभमशुभं निमित्तमुक्तं पुरापि यन्निगमे ।
तस्यापि तथा स्वप्ने दर्शनमिष्टं ह्यनिष्टं च ॥ ६३ ॥
अंत्यस्त्री पुष्पवती स्पर्शे त[द्]द्यूतेषु मैथुने पचने ।
स्वप्ने दिने ऽपि जाते स्यात् पुण्येतरो नरः स्नात्* ॥ ६४ ॥
ये भट्टवाग्भट्टवाचस्पतिचरकसुश्रुतरत्नकोशेषु† ।
उक्ताः स्वप्नविशेषाः शुभाशुभास्ते मयाप्युदिताः ॥ ६५ ॥
कर(पर)हृदयाभिप्रायं परगदितार्थस्य वेत्ति यस्तत्त्वं ।
सत्यं भुवने दुर्लभसंभूतिः स कविरेवैकः ॥ [१]६६ ॥

इति महत्तमश्रीमद्दुर्लभराजात्मजश्रीजगदेवविरचिते (thus also eds.) स्वप्नचिंतामणौ दुःस्वप्नाधिकारो द्वितीयः ॥ संवत् १६८७ वर्षे जेष्ठवदि २ द्वितौ रविदि लि॰ सामिहरिसंकर-गिरि ॥ श्रीरामपंड्यापठनार्थं ॥

A lithographed edition of this little work (of which an incomplete copy is in the India Office Library) was published in India in 1848 (cf. R. Pischel, Zeitschr. d. D. Morg. Ges., xl., p. 114); another, printed edition, at Ratnagiri, in 1873. The text seems to be identical in the two eds., but they are accompanied by different Marāṭhī commentaries. In the latter edition, the text consists of two chapters (*adhyāya*), treating of lucky and unlucky dreams, and consisting of 150 and 162 *ślokas* respectively. Our MS. has 166 verses in part II., and at least 153 in part I., fol. 15 terminating at the end of the 3rd *pāda* of v. 153 (150 eds.) with शुभं त्यक्ता (मुक्ता eds.), after which two leaves are missing. The missing leaves of the MS. contained I., 71–120*a* (119 in eds.); II., 1–20*a* (16 in eds.), 31*b*–54 (27*b*–50 eds.).

---

* The ed. reads this verse thus:

अंतःस्त्री पुष्पवती सङ्गिस्तस्यां च मैथुने वपने ।
स्वप्ने दिने ऽपि चेत्स्यात् पुण्यजनो ऽतो नरः स्नायात् ॥ ६५ ॥

After this the edition adds another verse:

चांडालस्पर्शो ऽपि स्वप्ने शीघ्रं भयप्रदो राज्ञः ।
गदिता नेष्टाः स्वप्नाः प्राचां ग्रंथान्विलोक्य यत्नेन ॥

† ये भद्रबाहुसुश्रुतवाचस्पतिचरकरत्नकोशेषु ed.

In this MS. it is preceded by a treatise on palmistry (*sāmudraka*) in Hindi, comprising 12 leaves.

For another MS. see Rāj. Mitra, Bikaner Cat., p. 340. [GAIKAWAR.]

3137.

1681a. Foll. 43; size $9\frac{1}{2}$ in. by $3\frac{3}{4}$ in.; fair Devanāgarī writing of 1798 A.D.; eight lines in a page.

Meghamālā, a course of meteorological observations on clouds and rain, and astrological predictions derived from the form and colour of clouds, and their appearance in different seasons.

Whilst in the colophons of the Oxford MS. (Hultsch Coll.), kindly collated by Dr. Macdonell, the treatise is throughout called *Raudrī Meghamālā* (इति श्रीरौद्रीमेघमालायां॰), in the present MS. the same title (or rather *Raudrimeghamālā*) is given to it in the colophons on fol. 24*a* and from fol. 28*b*; whilst in the others it is either called (*śrī-Mahādeva-kritā*, fol. 4*a*) *Māheśvarī Meghamālā*, or simply *Meghamālā*. According to the Oxford MS., the treatise would seem to form part of the *Gargasaṃhitā*.

Like Tantric works, it is composed in the form of dialogues between *Śiva* and *Pārvatī*, whilst *Garga* and *Indra* also appear as interlocutors. Rather incorrect. It begins:

नीत्या तावदमी नराधिपतगः पाल्याः प्रजाः पुत्रवत्
तावन्नीतिविदः स्वधर्मनिरतास्तावन्मुनीनां तपः ।
तावन्मित्रकलत्रपुत्रपितरः स्नेहेन तिष्ठंत्वहो
यावत्स्वं प्रतिवत्सरं जह्धरे(*r.* जलधर) क्षोणीतले
[वर्षेति(? वर्षेसि) ॥ १ ॥
यं देवा न जानंति(! A., Oxf. MS.) तं प्रपश्यति
[मानुजाः(? तं पृछंति हेलया लोकाः O.) ।
स्खलिते हास्यं कुर्वंति मितेन(मिलिने O.; ?मृतेन) [न]
[च विस्मयः ॥ २ ॥
एकं ज्योतिषशास्त्रं कलियुगकालेषु गर्वमुद्वहति(॰ते O.)।
पश्यैकं(यस्यैकं O.; ? *r.* एकं) तार्किकनिवहैर्न शक्यते
[चालनं कर्तुम् ॥ ३ ॥
क्षुद्रे पाषण्डधूर्ते च रिक्तहस्तोपहासके ।
ज्ञानं न तथ्यतामेति यदि शंभुः(शंभुं O.) स्वयं वदेत्॥४॥
इति प्रश्नोत्तरम्(श्रीगर्ग उवाच O.) ।
कैलासशिखरासीनं भैरवं परमेश्वरं ।
गणैश्चाप्सरसोभिश्च (! A., O.) गीतगन्धर्वनादितैः
[(*r.* ॰तं) ॥ ५ ॥
गणकोटिसमायुक्तं विद्याधरनिषेवितं ।
मालाधरैस्तथा यक्षैर्वानराद्यैश्च संयुतम्(संवृतं O.)॥ ६ ॥
अर्धाङ्गे ललिता देवी वामभागे व्यवस्थिता ।
शिरसि चन्द्रमाश्चैव वासुकिः कण्ठमाश्रितः ॥ ७ ॥
त्रिलोचनं पंचवक्त्रं दशबाहुव्यवस्थितम् ।
प्रणम्य तं सुरैर्दिव्यः(सुरैः सर्वैः O.) सिद्धगंधर्वकिन्नरैः॥८॥
मुनिभिर्गौतमाद्यैश्च वसिष्ठप्रमुखैस्तथा ।
दृष्ट्वा तं देवं देवेशं पार्वती परिपृच्छति ॥ ९ ॥
देव्युवाच ॥
देवदेव सुरेशान अनादिपरमेश्वर ।
मेघाश्च कीदृशा देव कथं विन्दुः प्रजायते ॥ १० ॥
शरीरं वर्णरूपं च लक्षणं कीदृशं तथा ।
स्वर्गलोके स्थिता ये च मृत्युलोके व्यवस्थिताः ॥ ११ ॥
पाताले चैव ये मेघास्त्रैलोक्ये च व्यवस्थिताः ।
यन्मया देव पृष्टस्त्वं कथयस्व प्रसादतः ॥ १२ ॥
ईश्वर उवाच ॥
शृणु देवि परं गुह्यं मेघमाला तु यादृशी ।
कार्त्तिके चैव मासे तु मेघानां पुष्पसंभवः ॥ १३ ॥ ॰

The treatise is divided into 24 sections (*adhyāya*, foll. 13*a*, 40*b*, and throughout the Oxf. MS.), which are not numbered in the present MS., but are so in the Oxf. one, viz.: 1. *kārttikādishaṇmāsagarbhalakshaṇam*, fol. 4*a*; 2. *arghakāṇḍam*, fol. 10*b*; 3. *gurunakshatra-phalam*, fol. 11*b*; 4. *meghagarbhasamudbhava*, fol. 13*a*; 5. *ashṭadigvāyulakshaṇam*, fol. 13*b*; 6. *utpātadarśanam*, fol. 17*b*; 7. *utpātajñāna-phalam* (*utpātaphalam*, O.), fol. 18*a*; 8. *garbha-nirṇaya* (*garbhaniścaya*, O.), fol. 20*a*; 9. *vidyul-lakshaṇam*, fol. 21*a*; 10. *kūrmacakram*, fol. 24*a*;

11. *rāja(-mantri-)phalam*, fol. 25*a*; 12. *mantriphalam* (*! grahamantrīphalam*, O.), fol. 25*b*; 13. (*rājamantri-*)*sasyādhipaphalam*, fol. 26*b*; 14. *saṃkrāntiphalam*, fol. 28*b*; 15. *muhūrta*(*-vicāra-* O.)*phalam*, fol. 29*a*; 16. *vāraphalam*, fol. 29*b*; 17. *saṃvatsaraphalam*, fol. 35*a*; 18. *ketuphalam*, fol. 37*a*; 19. *gargaśakrasaṃvāde saṃkrāntibhedakṛitodayam* (*saṃkrāntiphalam*, O), fol. 37*b*; 20. *saptanāḍīcakram*, fol. 39*b*; 21. *kāla*(*-vṛiksha-* O.)*nirṇaya*, fol. 40*a*; 22. *vārādhyāya*, fol. 40*b*; 23. *kākavṛikshanilaya* (prognostics regarding rain and clouds from crows' nesting and roosting), fol. 42*a*; 24. *kākāṇḍanirṇaya* (ib.; and *yoganirṇaya*, or influence of conjunctures on rain) ends (fol. 43*a*):

आषाढे पूर्णिमारात्रौ यदि चंद्रो न दृश्यते ।
चतुरो ऽपि तदा मासाञ्जलं मुंचति माधवः ॥ ६८९ ॥
यदि तत्रामलश्चंद्रः परिवेषयुतो ऽपि च ।
तदा जलं समर्थं(संहर्तुं) तु शक्रेणापि न शक्यते ॥ ६९० ॥
शुचौ कृष्णचतुर्थ्यां च उत्पताञ्चादितो रविः ।
त्रिमासमृक्षसंयुक्तं तदा वर्षति माधवः ॥ ६९१ ॥
कृष्णचतुर्दश्यां तुषाराज्ञ विपातयेत्(!) ॥

इति श्रीरौद्रिमेघमाला समाप्ता ॥

In the Oxf. MS. the text seems to proceed somewhat further; its final verses and colophon being as follows:

गोपनीयं प्रयत्नेन शिवेन परिभाषितं ।
गोप्यं गुह्यतमं देवि गोप्यं गुह्यं पुनः पुनः ॥
मेघमाला त्वियं नाम शिवशास्त्रमनुत्तमं ।
ज्योतिषाणां न(? प्र)हर्षाय तवाग्रे कथयाम्यहं ।
लोकानामुपकाराय ख्यातं सर्वं सुरेश्वरि ॥

इति श्रीरौद्रीमेघमालायां गर्गसंहितायां गर्भसंयोग ईश्वरपार्वतिसंवादे नाम चतुर्विंशो ऽध्यायः ॥

At the end of ch. 17 (fol. 34*b*) the present MS. gives two vernacular (Gujaratī) verses, introduced by अथ भडुलिवाक्यं। which are wanting in the Oxf. MS.; and these are again followed by three verses introduced by गर्ग उवाच।

In the 18th and 19th chapters, *Garga* is likewise made to instruct *Indra* in the *arcana* of meteorological astrology; and both sections conclude with *ślokas* introduced respectively by '*atha Varāhamihiraḥ*' and '*Varāhamihira uvāca.*' From ch. 20 to the end, *Īśvara* is again the speaker.

While some, at least, of the *Meghamālās* (cf. Cat. Cat.) ascribed to different authors in the various lists of MSS. (*Mahādeva, Śiva, Aindrī*) will probably be found to be identical with the present treatise, the Florence MS. (Aufrecht, Flor. MSS., no. 337) at all events seems to contain a different work.

[H. T. Colebrooke.]

3138.

868d. Fol. 1; size $10\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; good, old Devanāgarī writing; fourteen lines in a page.

A fragment of some astrological or Tantric work.

The first (incomplete) *śloka* is numbered 277; after which it proceeds:

रसशररेखा यावत्फलमुक्तं त्वष्टवर्गजं मुनिभिः ।
दैनप -- विचार्यं त्वनेन विधिना शुभाशुभं पुंसां ॥७८॥
दशाफलस्य ज्ञानाय तथादि न फलस्य च ।
प्रोक्तो मयाष्टको वर्गः शास्त्राच्च ब्रह्मयामलात् ॥ ७९ ॥

इत्यष्टवर्गः ॥

निःस्वो नीचरतश्चौरो निस्त्रपो बंधुवर्जितः ।
शत्रुप्रपीडितो रोगी स्वकाद्यैर्नीचगैर्ग्रहैः ॥ ८० ॥ ०

The last complete *śloka* (318) runs thus:

सवितुर्दशा च पुंसो विदधाति स्वत्रिकोणसंस्थस्य ।
उत्तमविषयपतित्वं विध्वस्ताशेषदुःखश्च ॥ १८ ॥

[H. T. Colebrooke.]

XI. Architecture and Technical Science (Śilpaśāstra).

3139.

2601. Foll. 77; size 12¼ in. by 4¾ in.; fair Devanāgarī writing of 1799 A.D.; nine lines in a page.

Viśvakarmaprakāśa, or *Vāstuśāstra*, a course of directions, in 13 chapters, on the building of houses, the making of roads, tanks, etc.; and the rites to be observed on such occasions, purporting to be founded on the revelation of *Viśvakarman*, still further traced back successively to *Bṛihadratha*, *Parāśara* and *Śambhu*. [A.]

It begins (as collated with B):

जयति वरदमूर्तिर्मङ्गलं मङ्गलानां
जयति सकलवन्द्या भारती ब्रह्मरूपा ।
जयति भुवनमाता चिन्मयी मोक्षरूपा
दिशतु मम महेशो वाङ्मयः शब्दरूपं ॥ १ ॥

आब्रह्मभुवनाल्लोका[द्] गृहस्थाश्रममाश्रिताः ।
यतस्तस्माद्गृहारम्भप्रवेशसमयं त्वहं ॥ २ ॥

प्रवक्ष्यामि मुनिश्रेष्ठ शृणुष्वैकाग्रमानसः ।
यदुक्तं शम्भुना पूर्वं वास्तुशास्त्रं पुरातनं ॥ ३ ॥

पराशरः प्राह बृहद्रथाय
बृहद्रथः प्राह च विश्वकर्मणे ।
स विश्वकर्मा जगतां हिताय
प्रोवाच शास्त्रं बहुभेदयुक्तं(विविधं प्रयत्नात् B) ॥ ४ ॥

विश्वकर्मोवाच ॥

वास्तुशास्त्रं प्रवक्ष्यामि लोकानां हितकाम्यया ॥ ५ ॥

पुरा त्रेतायुगे ह्यासीन्महाभूतं व्यवस्थितं ।
व्याप्यमानः शरीरेण सकलं भुवनं ततः ॥ ६ ॥

तं दृष्ट्वा विस्मयं देवा गताः सेन्द्रा भयावृताः ।
ततस्ते भयमापन्ना ब्रह्माणं शरणं ययुः ॥ ७ ॥

भूतभावन भूतेश महद्भयमुपस्थितं ।
क्व यास्यामः क्व गच्छामो वयं लोकपितामह ॥ ८ ॥

मा भयं कुरु भो(वो A) देवा विगृह्येत महाबलं(विगृह्यैतम्महा° B) ।
पातयाधोमुखं भूमौ निर्विशङ्का भविष्यथ ॥ ९ ॥

ततस्तैः क्रोधसंतप्तैर्गृहीत्वास्तमहाबलं(त्वा तं महाबलं B) ।
विनिक्षिप्तमधोवक्त्रं(विनिःक्षिप्यमधोवक्त्रा A) स्थिता-स्तत्रैव ते सुराः ॥ १० ॥

तमेव वास्तुपुरुषं ब्रह्मा समसृजत्प्रभुः ।
कृष्णपक्षे तृतीयायां मासि भाद्रपदे तथा ॥ ११ ॥

शनिवारे ऽभवज्जन्म नक्षत्रे कृत्तिकासु च ।
योगस्तस्य व्यतीपातः करणं वृष्टिसंज्ञकं(विष्टिः° B)॥१२॥

भद्रान्तरे ऽभवज्जन्म(भद्रांते चाभ° B) कुलिकेषु तथैव च ।
क्रोशमानं महाशब्दं(क्रोशमानम° B) ब्रह्माणं शममुद्यतं [(समुमुद्यतं A) ॥ १३ ॥

चराचरमिदं सर्वं त्वया सृष्टं जगत्प्रभो ।
विनापराधेन च मां(भो B) पीडयन्ति सुरा भृशं [(सुरासुरं B) ॥ १४ ॥

वरं तस्मै ददौ प्रीतो ब्रह्मा लोकपितामहः ।
ग्रामे वा नगरे(संगरे B) वापि दुर्गे वा पत्तने(पर्वते B) ऽपि वा ॥ १५ ॥

प्रासादे च प्रपायां च(प्रासादकरणे चैव B) जलोद्याने तथैव च ।
यस्त्वां(यो वा B) न पूजयेन्मर्त्यो मोहाद्वास्तुनर प्रभो [(नरं प्रभुं B) ॥ १६ ॥

अश्रियं मृत्युमाप्नोति विघ्नस्तस्य(विघ्नं तस्य A) पदे पदे ।
[इत्युक्त्वान्तर्दधे सद्यो देवो ब्रह्मविदां वरः (A omits this line)] ।
वास्तुपूजां प्रकुर्वीत गृहारम्भे प्रवेशने ॥ १७ ॥

द्वाराभिवर्तने(द्वारं च वर्तते B) चैव त्रिविधे(त्रिधैव B) च प्रवेशने ।
प्रतिवर्षं च यज्ञादौ तथा पुत्रस्य जन्मनि ॥ १८ ॥

व्रतबन्धे विवाहे च तथैव च महोत्सवे ।
जीर्णोद्धारे तथा शल्यन्यासे चैव विशेषतः ॥ २० ॥

वज्राग्निदूषिते(°दर्पिते B) भग्ने सर्पचाण्डालवेष्टिते ।
उलूकवासिते सुप्तरात्रौ(सप्त° B) काकाधिवासिते॥२१॥

मृगाधिवासिते रात्रौ गोमार्जाराभिनादिते(°रादिविवासिते B) ।
वारणाश्वादिविरुते स्त्रीणां युद्धाभिदूषिते ॥ २२ ॥

कपोतकगृहावासे(का° B) मधूनां(व°) निलये तथा ।
अन्यैश्चैव महोत्पातैर्दूषिते शान्तिमाचरेत् ॥ २३ ॥

अथ भूमिदर्शनं ॥

अथातः(अथान्यत् B) संप्रवक्ष्यामि लोकानां हितका-[म्यया ।
श्वेता रक्ता तथा पीता कृष्णवर्णानुपूर्वशः ॥ २४ ॥
सुगन्धा ब्राह्मणभूमौ(शुभगन्धा° भू B) रक्तगन्धा तु [क्षत्रिया(क्षत्रिणी B) ।
मधुगन्धा भवेद्वैश्या मद्यगन्धा(मद° B) च शूद्रिणी ॥ [२५ ॥ ° १२८ ॥

I. इति वास्तुशास्त्रे भूम्यादिपरीक्षालक्षणं प्रथमो ऽध्यायः ॥ fol. 7*a*.

II. अथ स्वप्नविधिः ॥
गणेशं लोकपालांश्च पृथिवीं च विशेषतः ।
ग्रहांश्च कलशे पूज्य यथामंत्रं यथोदितं ॥ १२९ ॥
यथाकल्पमुपस्कृत्य(°क्रम्य B) शुचौ देशे कुशानन: [(°ने B) ।
भूमौ शुद्धेन वस्त्रेण शीर्षे संपूजयेच्छ्रियं ॥ १३० ॥ ° ३२६ ॥

इति वास्तुशास्त्रे समयगृहादिनिर्माणे द्वितीयो ऽध्यायः ॥ fol. 17*b*.

III. अथातः संप्रवक्ष्यामि गृहकालविनिर्णयं ।
यथाकालं शुभं ज्ञात्वा तदा भवनमारभेत् ॥ ३२७ ॥
मृदुध्रुवस्वातीपुष्यधनिष्ठाद्वितये रवौ ।
मूले पुनर्वसौ सौम्यवारे प्रारम्भनं शुभं ॥ ३२८ ॥ ° ३९५ ॥

इति वास्तुशास्त्रे तृतीयो ऽध्यायः ॥ fol. 21*a*.

IV. चतुर्दशविधाः प्रोक्ता गृहाश्चोत्तममध्यमाः ।
निन्दिताश्च प्रमाणं च कथयामि समासतः ॥ ३९६ ॥
गृहं तद् द्विविधं प्रोक्तं शरीरं तु पृथग्विधं ।
शरीरं तु गृहं नाम शय्या शयनचक्रके ॥ ३९७ ॥ ° ४५६ ॥

इति वास्तुशास्त्रे गृहादिनिर्माणे चतुर्थो ऽध्यायः ॥ fol. 24*a*.

V. प्रोक्तं यद्भवता सम्यक् प्रासादानां यथाक्रमं ।
अधुना श्रोतुमिच्छामि वास्तुदेहस्य(°देवस्य B) लक्षणं ॥ [४५७ ॥
पुरा स भगवान् वास्तुपुरुषः परिकीर्तितः ।
पूर्वोत्तरमुखो वास्तुपुरुषः परिकीर्तितः ॥ ४५८ ॥
देवैरिन्द्रादिभिस्तस्मिन्काले(देवैः सेंद्रा° A) भूमौ नि-[पातितः ।
अवाङ्मुखो निपतित ईशानदिशि संस्थितः ॥ ४५९ ॥
शिरोभागे स्थितो वह्निर्मुख आपः स्तने यमः ।
उरस्तस्यापवत्सश्च सव्यमार्गे समाश्रितः ॥ ४६० ॥ ° ७१९ ॥

इति शिलान्यासे पंचमो ऽध्यायः ॥ fol. 39*a*.

VI. अथातः संप्रवक्ष्यामि प्रासादानां विधानकं ।
देवो रुद्रस्तथा विष्णुरिन्द्राद्याः(विष्णुर्ब्रह्माद्या A) [सुरसत्तमाः ॥ १ ॥
प्रतिष्ठाप्य शुभे स्थाने अन्यथा ते भयावहाः ।
गतादिलक्षणा धात्री गन्धस्वादेन या भवेत् ॥ २ ॥
वर्णेन च सुरश्रेष्ठ सा मही सर्वकामदा ।
पितामहस्य पुरतः कलान्यष्टौ तु यानि तु ॥ ३ ॥
तारयेदात्मना सार्धं विष्णोर्मंदिरकारकः ।
अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति ॥ ४ ॥
ये ध्यायन्ति सदा भक्त्या करिष्यामि हरेर्गृहं ।
तेषां विलीयते पापं पूर्वजन्मशतोद्भवं ॥ ५ ॥ ° ६ ॥
प्रासादे मृन्मये पुण्यं मयैतत्कथितं पुरा ।
तस्माद्दशगुणं पुण्यं कृते शैलमये भवेत् ॥ ७ ॥
ततो दशगुणं लोहे ताम्रे शतगुणं ततः ।
सहस्रगुणितं रौप्ये तस्मादुक्ते(?°द्रौक्ते; B blank [for दुक्ते) सहस्रकं ॥ ८ ॥
अनन्तफलमाप्नोति रत्नचित्रे मनोहरे ।
कनिष्ठं मध्यमं श्रेष्ठं कारयित्वा हरेर्गृहं ॥ ९ ॥ ° ४१ ॥

इति षष्ठो ऽध्यायः ॥ fol. 46*a*.

VII. अथातः शृणु विप्रेन्द्र द्वारलक्षणमुत्तमं ।
द्वाराणां चैव विन्यासं पक्षाः पञ्चदश स्मृताः ॥ ४२ ॥ ° १६२ ॥
इति द्वारविधिः प्रोक्तो मया ब्रह्ममुखोदितः ।
यः करोति विधानेन स सुखी पुत्रवान्भवेत् ॥ १६३ ॥

इति वास्तुशास्त्रे द्वारनिर्माणे सप्तमो ऽध्यायः ॥ fol. 52*b*.

VIII. अधुना कथयिष्यामि वापीकूपक्रियाविधिं ।
तडागपुष्करोद्यानमण्डपानां यथाक्रमात् ॥ १ ॥ ° ३४ ॥

इति वास्तुशास्त्रे जलाशयादिकरणे अष्टमो ऽध्यायः ॥ 54*b*.

IX. अथातः शृणु विप्रेन्द्र दारूणां छेदने विधिं ।
सुरदारुचन्दनसमी(शमी)मधूकतरवस्तथा ॥ ३५ ॥ ° ८५ ॥

इति वास्तुशास्त्रे वृक्षच्छेदनविधौ नवमो ऽध्यायः ॥ 57*b*.

X. अथ प्रवेशो नवमदिनस्य
सौम्यायने जीवसिते वलाद्ये(जीवसिते वलाद्ये B)।
स्याद्वेशनं ज्येष्ठतपोत्यमाधवे(? ज्येष्ठतपोसमाधवे A)
मार्गे शुचौ मध्यफलप्रदं स्यात् ॥ ८६ ॥ ° २०६ ॥

इति श्रीवास्तुशास्त्रे गृहप्रवेशविधिप्रकरणे दशमो ऽध्यायः ॥ fol. 63*b*.

XI. अथातः शृणु विप्रेन्द्र दुर्गाणां करणं तथा ।
येन विज्ञानमात्रेण(? विज्ञात°) अबलः सबलो भवेत् ॥ [२०७ ॥ ° २३४ ॥

तादृक्पुराणि सर्वाणि कारयेत्स्थपतिः क्रमात् ।
अथातः संप्रवक्ष्यामि यदुक्तं ब्रह्मयामले ॥ २३५ ॥ ° २६४ ॥

इति वास्तुशास्त्रे कोटवास्तौ एकादशो ऽध्यायः ॥ 67*a*.

XII. अतः परं प्रवक्ष्यामि शल्यज्ञानविधिं पुनः ।
येन विज्ञानमात्रेण गृहेशः सुखमाप्नुयात् ॥ २६५ ॥ ° ३४३ ॥

इति वास्तुशास्त्रे शल्योद्धारविनिर्णयो नाम द्वादशो ऽध्यायः ॥

XIII. अतः परं प्रवक्ष्यामि गृहाणां वेधनिर्णयं ।
अन्धकं रुधिरं चैव कुब्जकानां च धीरकं(धारकं B) [॥ १ ॥

दिग्वक्त्रं(दिग्बन्धं B) चिपिटं चैव व्यङ्गजं मुरजं तथा ।
कुटिलं कुदकं चैव समं(? सन्नं A, सुमं B) च शङ्खपालकं [॥ २ ॥ ° १०७ ॥

यद्द्वारमार्गे पूर्वोक्तो ध्वजः षोडशहस्तकः ।
स्तम्भो ऽस्य विधिवत्स्थाप्यः सघण्टाभरणीकृतः ॥ १०८ ॥

पुष्पमालान्वितः स्थाप्यो द्वारमार्गे ऽथ दक्षिणे ।
इति प्रोक्तं वास्तुशास्त्रं पूर्वं गर्गाय धीमते ॥ १०९ ॥

गर्गात्पराशरः प्राप तस्मात्प्राप बृहद्रथः ।
बृहद्रथाद्विश्वकर्मा प्राप्तवान् वास्तुशास्त्रकं ॥ ११० ॥

स विश्वकर्मा जगतो हितायाकथयत्पुनः ।
वासुदेवादिषु पुनर्भूलोकभक्तितो ऽब्रवीत् ॥ १११ ॥

इदं पवित्रं परमं रहस्यं यः पठेन्नरः ।
न स्यादवितथा वाणी [तत्ते] सत्यं वदाम्यहं ॥ ११२ ॥

अथ स विमलविद्यो विश्वकर्मा महात्मा
सकलगुणवरिष्ठः सर्वशास्त्रार्थवेत्ता ।
सकलसुरगणानां सूत्रधारः कृतात्मा
भवननिवसतां सच्छास्त्रमेतच्चकार ॥ ११३ ॥

इति ब्रह्मोक्तविश्वकर्मप्रकाशे विश्वकर्मणोक्ते वास्तुशास्त्रे त्रयोदशो ऽध्यायः ॥

Cf. Rāj. Mitra, Notices, ii., p. 17.

[MACK. COLL.]

3140.

2038b. Foll. 52 (and an unnumbered leaf between 40 and 41); size 13¼ in. by 4 in.; good Bengalī handwriting (European paper, watermark 1808); eight lines in a page.

The same work.

This MS., though its readings may often be less acceptable, is written more accurately. It is however less easily consulted, the verses not being numbered. The last page, having thin paper pasted over it, is illegible in some places. [DR. F. BUCHANAN.]

3141.

3014. Foll. 472 (one page of each of which is left blank); folio, size 11 in. by 7 in.; Devanāgarī writing of 1830 A.D.; 16 or 17 lines (each line a half-*śloka*) in a page.

Mānasāra Vāstuśāstra, an extensive work on the same subject. Fragmentary. Very incorrect.

The first few pages are quite fragmentary, the original MS. having apparently been very much worm-eaten or full of lacunæ.

It begins: पतनं चैव शिविरं वहनीमुखं । सानिधदोणकं चैव प्रोक्तं दुर्गं च सप्तकं । ° this would seem to belong to the 16th or 17th *adhyāya*.

Fol. 8:

तत्र संयुक्तसंधिश्च सर्वतोभद्रमीरितं ।
एतत्संधिविधि चाग्रं यदायुक्ति(*r.* यथा°) यथाबलं ॥ °

The following chapters (*adhyāyas*) are marked:

XVII. *sandhividhānam*, ends fol. 13: इति मानसारे वास्तुशास्त्रे संधिर्मविधानो(!) नाम सप्तदशमोध्यायः ॥

XVIII. *vimānalakshaṇavidhānam,* beg. fol. 13: विमानलक्षणं चैव संक्षेपाद्वक्ष्यते ऽधुना । ° after 69 *ślokas,* a fresh numeration begins with *śl.* 2: गलोचाद्यर्धतुंगं वा °; ends: °एतत्सप्तविधं प्रोक्तं चैकभूमिविधानके ॥ ७७ ॥ विमानं ॥

XIX. *bhūmividhānam,* beg. fol. 30: विमानं समयं हर्म्यं चायं वासहिम्यकं (!) । ° 72 vv.; इति °वाक- भूमिविधानो नाम एकोनविंशोध्यायः ॥

XXII. *catuḥsthalavidhānam,* beg. fol. 39: द्वितलानामलंकारं वक्ष्ये संक्षिप्यते ऽधुना । ° 93 vv.

XXV. *saptatalavidhānam,* beg. fol. 49: पंचभूमिविधानस्य लक्षणं वक्ष्यते ऽधुना । ° 16 vv.

XXVI. *ashṭatalavidhānam,* beg. fol. 51: अष्टतलप्रमाणं स्यात् – । ° 36 vv.

XXVII. (?) *navabhūmividhānam,* beg. fol. 55: नवभूमिविधानं स्याल्लक्षणं वक्ष्यते ऽधुना । ° 19 vv.; इति मानसारे वास्तुशास्त्रे –

XXVIII. or XXX. *vimānavidhānam,* beg. fol. 57: – द्यांनपंचशालांशं ° 62 vv.; इति ° विमानविधानो नाम द्वाशतलत्रिंशोध्यायः ॥

XXXI. (?), beg. fol. 65: बल्यर्थं परिवारार्थं शोभार्थं लक्षणार्थकं । ° 86 vv.; without colophon.

XXXII. *parivāravidhānam,* beg. fol. 75: विष्णवालयपरिवारलक्षणं वक्ष्यते ऽधुना । ° 25 vv.

XXXIII. ? *gopuralakshaṇavidhānam,* beg. fol. 78: तैतलानां नृपाणां च गोपुराणां च लक्षणं । ° 192 vv. (after v. 182 to end of vol. the verses are not numbered); without colophon.

XXXIV. *maṇḍapavidhānam,* beginning wanting, see below.

XXXV. *śālāvidhānam,* beg. fol. 110: सुराणां भूसुराणां च वर्णानां वासयोग्यकं । ° see Burnell, Tanjore MSS., p. 62*a* (*adhy.* 35–47).

XXVIII. (?) *rājanyāyavidhānam,* beg. fol. 124: द्विजातीनां च सर्वेषां वर्णानां वासयोग्यकं । °; इति° राजन्यायविधानो नाम चत्वारिंशोध्यायः (!) ॥

XXXIX. (?) *rājagṛihavidhānam,* beg. fol. 127: अथ वक्ष्ये विशेषेण भूपानां लक्षणं परं । °; ends: इति राजगृह(corr. into राजन्याय)विधानो नाम नवत्रिंशोध्यायः (the number was scored out, and चत्वा written after it, but then again scored out).

XL. *rājalakshaṇavidhānam,* beg. fol. 130: भूपतीनां च सर्वेषां सर्वांगं वक्ष्यते ऽधुना । °; ends: इति° राजलक्षणविधानो नाम चत्वारिंशोध्यायः ॥

XLVII. (?) *kalpavṛikshavidhānam,* beg. fol. 134: अथ वक्ष्ये विशेषेण भूपानां लक्षणं परं । °; ends: इति ° कल्पवृक्षविधानो नाम सप्तचत्वारिंशोध्यायः ॥

XLV. (? *maulilakshaṇa* and) *toraṇavidhānam,* beg. fol. 140: मौलिलक्षणं । देवानां भूपतीनां च मौलिलक्षणमुच्यते । °; ends: इति° तोरणविधानो नाम पंचचत्वारिंशोध्यायः ॥ the beginning and end probably belong to two different chapters.

XLVI. *madhyaraṅgavidhānam,* beg. fol. 151: मध्यरंगस्थानं । देवानां च नृपाणां च तानकासनयोग्यकं (!) । °

XLVII. or XLVIII. *abhishekavidhānam,* beg. fol. 154: देवानां तु कवत्र्यादि (!) भूपालानां तु योग्यकं । °; ends fol. 165: इति अभिषेकविधानो नाम अष्टचत्वारिंशोध्यायः ॥

LIV. *lakshaṇavidhānam,* beg. fol. 166: देवानां भूपतीनां च भूषणार्थं (?°र्थं) तु लक्षणं । ° – – fol. 184: जैनलक्षणं । स्थावरं जंगमं जीनलक्षणं वक्ष्यते ऽधुना । °

LV. *bauddhalakshaṇavidhānam,* beg. fol. 186: बौद्धस्य लक्षणं वक्ष्ये सम्यक्त विधिनाधुना । °

LVI. *muni* (? *ṛishi*)*lakshaṇavidhānam,* beg. fol. 187: पंचऋषिलक्षणं । ऋषीणां लक्षणं वक्ष्ये शास्त्रे संक्षिप्यते ऽधुना । °; ends: इति ° मुनिलक्षणविधानो °

LVII. *yakshavidyādharavidhānam,* beg. fol. 192: यक्षलक्षणं । यक्षविद्याधराणां च लक्षणं वक्ष्यते ऽधुना । °

LVIII. *bhaktalakshaṇavidhānam,* beg. fol. 193: अधुना वक्ष्यते सर्वं भक्तानां लक्षणं क्रमात् । °; end wanting.

LIX. *vāhanavidhānam,* beg. wanting; see below.

LX. *garuḍalakshaṇavidhānam*, beg. fol. 200: हंसवाहनराजस्य लक्षणं वक्ष्यते ऽधुना ।

LXI. *gopuravidhānam*, beg. fol. 205: वृषस्य लक्षणं सम्यक् वक्ष्यते विधिनाधुना । °

The following chapters are here numbered consecutively, the place for the numbers in the resp. colophons being left blank.

1. *maṇḍapavidhānam*, beg. fol. 214: सर्वेषां मंडपानां तु लक्षणं वक्ष्यते ऽधुना । ° cf. above XXXIV.

2. *śālāvidhānam*, beg. fol. 241: सुराणां भूपतीनां च वर्णानां वासयोग्यकं । सर्वेषामपि शालानां लक्षणं वक्ष्यते ऽधुना ॥

3. *gṛihamānasthānavinyāsa*, beg. fol. 263: द्विजातीनां च सर्वेषां वर्णानां वासयोग्यकं । गृहाणां मानविन्यासं स्थापनं वक्ष्यते ऽधुना ॥

4. *gṛihapraveśanavidhānam*, beg. fol. 268: अथ वक्ष्ये नराणां च गृहवेशस्य लक्षणं । °

5. *dvāravidhānam*, beg. fol. 274: द्वारस्थापनविन्यासलक्षणं वक्ष्यते ऽधुना । °

6. *dvāravidhānam*, beg. fol. 276: द्वारमानविधिं वक्ष्ये लक्षणं वक्ष्यते ऽधुना । °

7. *rājalakshaṇavidhānam*, beg. fol. 293: भूपतीनां च हर्म्याणां लक्षणं वक्ष्यते ऽधुना । °

8. *rathalakshaṇavidhānam*, beg. fol. 301: देवभूसुरभूपानामारोहणार्थयोग्यकं । °

9. *toraṇalakshaṇavidhānam*, beg. fol. 311: देवानां च द्विजातीनां वर्णानां शयनादिकं । ° cf. above, XLV.

10. *madhyaraṅgavidhānam*, beg. fol. 326: देवानां च नृपाणां च चरास्तासनयोग्यकं । ° this corresponds to XLVI. above, though clearly derived from a different MS.

11. *abhishekalakshaṇavidhānam*, beg. fol. 328: देवानां भूपतीनां च मौलिलक्षणमुच्यते।° this corresponds to the beginning of XLV. above, but differs soon after. The latter part, on the other hand, corresponds to that of XLVII.

12. *liṅgavidhānam*, beg. fol. 341: देवानां भूपतीनां च भूषणानां तु लक्षणं । ° corresponding to LIV. for the first few verses.

13. *pīṭhalakshaṇavidhānam*, beg. fol. 354: सर्वेषामपि लिंगानां वक्ष्यते पीठलक्षणं । °

14. *śaktividhānam*, beg. fol. 359: शक्तीनां च हृतवर्णलक्षणं वक्ष्यते ऽधुना । सरस्वती चैव सावित्री लक्ष्मी च मही तथा ॥ °

15. *jinalakshaṇavidhānam*, beg. fol. 370: सुगतिस्वातिकं धूनलक्षणं वक्ष्यते ऽधुना । ° different from the *jainalakshaṇam* in LIV.

16. *bauddhalakshaṇavidhānam*, beg. fol. 376: बौद्धस्य लक्षणं वक्ष्ये सम्यक् च विधिनाधुना । °

17. *ṛishilakshaṇavidhānam*, beg. fol. 377: ऋषीणां लक्षणं वक्ष्ये शास्त्रे संक्षिप्यते ऽधुना । ° this corresponds to LVI. above, but it has some more matter following it (? a different chapter, *munilakshaṇam*).

18. *yakshavidyādharalakshaṇavidhānam*, beg. fol. 378: यक्षविद्याधराणां च लक्षणं वक्ष्यते ऽधुना । ° this corresponds to LVII. above.

19. *bhaktalakshaṇavidhānam*, beg. fol. 380: अधुना वक्ष्यते सम्यग् भक्तानां लक्षणं क्रमात् । °

20. *vāhanavidhānam*, beg. fol. 394: अथ वक्ष्ये त्रिमूर्तीनां वाहनानां तु लक्षणं । °

21. *garuḍalakshaṇavidhānam*, beg. fol. 397: विहंगराजस्य मानं च लक्षणं वक्ष्यते ऽधुना । ° the first half corresponds to that of LX., the latter part different.

22. *pratimālakshaṇam uttamam daśatālavidhānam*, beg. fol. 401: वृषस्य लक्षणं सम्यग् वक्ष्यते विधिनाधुना । °

23. *strīmānamadhyamam daśatālavidhānam*, beg. fol. 418: — — वुष्णीमात् — सविंशतिशतांगुलं । °

24. *madhūcchishṭalakshaṇavidhānam*, beg. fol. 423: सर्वेषां देवदेवीनां लक्षणं वक्ष्यते ऽधुना । °

25. *aṅgadūshaṇavidhānam*, beg. fol. 426 : ञ्चाल्पाद्यंगसर्वेषां हीनाधिक्यं भवेद्यदि । °

26. *aṅgabhūshaṇavidhānam*, beg. fol. 431 and again fol. 457 : देवानामपि देवीनां भक्तानां नेत्रमोक्षणं । लिंगानां लक्षणोद्धारं वस्त्रादीनां यथाक्रमं ॥ °

This would seem to be the last chapter of the work, as it concludes as follows, fol. 464 :

[स्व]हृदयकमलमध्ये दीपवत्तत्परं स्यात्
कमलजहरहरादिदेवतानां च सर्वं ।
विधिमिह सकलरूपचक्षुरुन्मीलनं च
कृतिमितिरखिलमुक्तमानसारं पुराणैः ॥
पितामहेंद्रप्रमुखैस्समस्त-
देवैरिदं शास्त्रपरं पुरोदितं ।
तस्मात्समुद्धृत्य त्ति(*r.* हि) मानसारं
शास्त्रं कृतं लोकहिताय वै यथा(क्रमात्) ॥

After a blank leaf (465) there are the following additional sections :

27. *liṅgalakshaṇavidhāna*, beg. fol. 466 : उत्तरायणमासे तु शुक्लपक्षे शुभोदये । °

28. (?) beg. fol. 470 : अथ वक्ष्ये ऽहं स्फटिकं (लिंगं) नीचमध्योत्तमं क्रमात् । ° breaks off abruptly on fol. 472.

The title *Mānavasāra* (Burnell, Tanjore MSS., p. 62) is not met with in this copy.

Goldstücker, in his dictionary, s.v. *abhisheka*, p. 284, refers to the work as reputedly the most complete Hindu work on architecture, but of more than doubtful antiquity.

The fly-leaf contains the following note :— "This portion of the *Śilpaśāstram* was copied from a very ancient manuscript, in the old Tamil character, discovered at Trichinopoly. It was imperfect both at the beginning and at the end. It was written out under the directions of Charles Philip Brown. 1830." From various indications it would, however, rather seem that the volume was copied from two different MSS., one a Grantha, the other a Telugu MS. (? Grantha MS. no. 1987, and Telugu MS. no. 525 in Taylor's Cat. Rais., I. 71 ; II. 355). This would account for certain repetitions, as well as for certain orthographic peculiarities (such as *yeka* for *eka*, *vuttara* for *uttara*) pointing to a Telugu source.

[C. P. Brown.]

3142.

1291. Foll. 24 ; size $12\frac{3}{4}$ in. by 5 in. ; good, clear Devanāgarī writing of 1800 A.D. ; twelve lines in a page.

Rājavallabhamaṇḍana (or *Bhūpativallabha*) *Vāstuśāstra*, a work on the architectural disposition of houses, palaces, temples, etc., and the rites to be performed at their inauguration, in 14 chapters, by *Maṇḍana*, an architect in the employ of King *Kumbhakarṇa* of *Medapāṭa*.

According to Tod, a King *Kumbho*, who had a taste for arts and built many temples and strongholds, ruled over the country of Mevāḍ from 1419 to 1469 A.D. (cf. Bhandarkar, Report 1882-83, p. 37).

I. *miśrakalakshaṇam*, begins :

आनंदं वो गणेशार्कविष्णुगौरीमहेश्वराः ।
देवाः कुर्युः श्रियं सौख्यमारोग्यत्वं गृहे सदा ॥ १ ॥
देवं नमामि गिरिजात्मजमेकदंतं
सिंदूरचर्चितवपुःसुविशालसुंडं (*r.* शुंडं) ।
नागेंद्रमंडिततनुं युतसिद्धिबुद्धिं
सेव्यं सुरोरगनरैः सकलार्थसिद्धै ॥ २ ॥
या ब्रह्माद्यैरलक्ष्या त्रिभुवननमिता ब्रह्मपुत्री शिवाद्या
ब्रह्मा विष्णुश्च रुद्रः प्रणमति बहुशो यां सदानंदरूपां ।
वाणी चैतन्यरूपे वसति च सकले प्राणनिद्राक्षुधातृट्
सा नित्यं सुप्रसन्ना वितरतु विभवं विश्वरूपा च लोके ॥ ३ ॥
कं वा सूत्रांबुपात्रं वहति करतले पुस्तकं ज्ञानसूत्रं
हंसारूढस्त्रिनेत्रः सुरमुकुटशिरःसर्वतोवृद्धकायः ।
त्रैलोक्यं येन सृष्टं सकलसुरगृहं राजहर्म्यादिहर्म्यं
देवो ऽसौ सूत्रधारो जगदखिलहितः पातु वो विश्वकर्मा ॥ ४ ॥

स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं
जंतूनां लयनं सुखास्पदमिदं शीतांबुघर्मापहं ।
वापीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते
गेहं पूर्वमुशंति तेन विबुधाः श्रीविश्वकर्मादयः ॥ ५ ॥

सिद्धे गृहारंभमुशंति वृद्धा
यथोदिते मासि वलक्षपक्षे ।
शशांकवीर्ये सुदिने निमित्ते
शुभे रवौ सौम्यगते प्रवेशः ॥ ६ ॥

चैत्रे शोककरं गृहादिरचितं स्यान्माधवे ऽर्थप्रदं
ज्यैष्ठे मृत्युकरं शुचौ पशुहरं तद्वृद्धिदं श्रावणे ।
शून्यं भाद्रपदे ऽश्विने कलिकरं भृत्यक्षयं कार्त्तिके
धान्यं मार्गसहस्ययोर्दहनभीर्माघे श्रियः फाल्गुने ॥ ७ ॥
[० ४० ॥

सुशीलश्चतुरो दक्षः शास्त्रज्ञो लोभवर्जितः ।
क्षमायुक्तो द्विजश्चैव सूत्रधारः स उच्यते ॥ ४१ ॥

II. *vāstulakshaṇam*, begins fol. 3*b*:

संग्रामे ऽन्धकरुद्रयोश्च पतितः स्वेदो महेशात्क्षितौ
तस्माद्भूतमभूच्च भीतिजननं द्यावापृथिव्योर्महत् ।
तद्देवै रभसा विगृह्य निहितं भूमावधोवक्त्रकं
देवानां वसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः ॥ १ ॥

प्रासादे भवने तडागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारंभनिवर्तने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवे ऽङ्घ्रिकरयोः संधौ च कोणद्वये
[॥ २ ॥ ० ३८ ॥

III. *āyādilakshaṇam*, fol. 5*a*:

आयर्क्षव्ययतारकांशकविधून् राशिग्रहाद्यं तथा
धान्यं सौख्ययशो ऽपि वृद्धिरधिका यस्मादतः कथ्यते ।
आयास्तु ध्वजधूमसिंहशुनका गोरासभेयाः(?०भाः) क्रमात्
ध्वांक्षस्त्वष्टम आयकेषु विषमाः श्रेष्ठाः सुराणां गृहे ॥
[१ ॥ ० २३ ॥

IV. *prākārayantravāpīkūpataḍāgalakshaṇam*, fol. 6*a*:

वापीकूपतडागदेवभवनान्यारामयागादिकं
तीर्थानामवगाहनं च विधिवत्कन्याप्रदानादिकं ।
सर्वं पुण्यमिदं नृपः स लभते यः कारयेत्पर्वते
दुर्गं सर्वजनाय शर्मजननं विश्राममेकं परं ॥ १ ॥ ० ३६ ॥

V. *rājagṛihaniveśādilakshaṇam*, fol. 8*a*:

अथो नृपाणां भवनानि वक्ष्ये
चैकातपत्रावनिपालकस्य ।
शतं च हस्ताष्टसमन्वितं च
व्यासे गृहे चोत्तममेव तस्य ॥ १ ॥ ० ४७ ॥

VI. *ekaśāladviśālagṛihalakshaṇam*, fol. 10*a*:

अथैकशाला द्विगुणा द्विशालं
प्रस्तारतो लक्षणमेव तेषां ।
यथोदितं वास्तुमते तथैव
ब्रवीमि राज्ञामथ मानवानां ॥ १ ॥ ० ३५ ॥

VII. *dviśālatriśālacatuḥśālagṛihalakshaṇam*, fol. 11*b*:

द्विशालगेहानि च षोडशैव
वास्तूदधेः सारतरं पुनश्च ।
वक्ष्याम्यलिंदोक्त(घ)णका लघुश्च(!)
द्वौ तिंदुकाख्यौ कथितावलिंदौ ॥ १ ॥ ०३० ॥

VIII. *śayanasiṃhāsanacchattragavākshasabhāshṭakavedikācatushṭayadīpalakshaṇam*, 13*a*:

शयनमथ नृपाणां त्वंगुलानां शतैकं
नवतिरपि सुतानां मंत्रिणः षड्विहीनं ।
बलपति गुणहस्तं त्र्यंगुलोनं गुरोश्च
तदनु युगलहीनं ब्राह्मणादेः प्रशस्तं ॥ १ ॥ ० १८ ॥

IX. *rājagṛihādilakshaṇam*, fol. 14*a*:

गृहा वास्तुशास्त्रोदधौ राजयोग्या
अनंता हि संत्यत्र तेभ्यः कियंतः ।
मयोक्ताश्च योग्या नृपाणां समृद्धै
सुशोभान्वितास्ते च कल्याणदाश्च ॥ १ ॥ ० ३९ ॥

X. *māpitakshetrādbhutalakshaṇam*, fol. 15*b*:

छाया चाणू रेणुकेशाग्रलिक्षा
यूकाः प्रोक्ता स्याद्यवस्त्वंगुलं हि ।
छायादिभ्यो ऽष्टाद्यमानस्य वृद्धिः
प्रोक्तो हस्तो जैनसंख्यांगुलैश्च ॥ १ ॥ ० २४ ॥

XI. *dinaśuddhigṛihaniveśagṛihapraveśavivāhamuhūrtalakshaṇam*, fol. 17*a*:

नंदा तिथिः षट् प्रतिपच्च रुद्रा
द्वितीयादशी सप्तमिका च भद्रा ।
जया तृतीयाष्टमिका च विश्वा
रिक्ता चतुर्थी नवमी च भूता ॥ १ ॥ ० ३६ ॥

XII. *gocaradinarātrimānasvarodayakoṭacakra-māṭrikālakshaṇam*, fol. 18*b*:

प्राक्पक्षे धवले शशी यदि शुभः पुंसां स पक्षः शुभः
कृष्णे चेदशुभस्तदाशुभकरो व्यत्यासतो निष्फलः ।
ताराविर्यवशात् शशी विधुबलादिष्टो रवेः संक्रमः
शस्ता भानुबलाद्भवंति खचरा दुष्टाः स्थिता गोचरे ॥
[१ ॥ ० ३२ ॥

XIII. *jyotishalakshaṇam*, fol. 20*a*:

पूर्वात्रयं सार्पयमाग्निधिष्ण्म(*r.* धिष्ण्यम्)
अधोमुखं मूलमघा विशाखा ।
खाते च भूम्यां निधिरोपणे च
तयोग्रकार्ये मुनयो वदंति ॥ १ ॥ ० ३१ ॥

XIV. *śakunalakshaṇam*, fol. 21*b*:

तिथिवारर्क्षयुते ऽपि गुणौघे
किमपि न कार्यं शकुनं विरुद्धे ।
तेषामनुकूले ऽपि च दोषे
शकुने सिद्धिमुपैति सदैव ॥ १ ॥ ० ४२ ॥

दुर्गा गतिः पिंगलिकारुतं च
चेष्टा शुनः स्थानकमेव काके ।
दिशः शिवा या शकुने मुनींद्रैर्
एतद्विशेषात्कथितं बलिष्ठं ॥ ४२ ॥

श्रीमेदपाटे नृपकुंभकर्णस्
तदंह्रिराजीवपरागसेवी ।
स मंडनाख्यो भुवि सूत्रधारस्
तेन कृतो भूपतिवल्लभो ऽयं ॥ ४३ ॥

गणपतिगुरुभक्त्या भारतीपादतुष्ट्या
मुनिमतमिदमुक्तं वास्तुशास्त्रं सुवृत्तं ।
गणितमपि च सारं शाकुनं सारभूतं
भवतु चतुरयोग्यं विश्वकर्मप्रसादात् ॥ ४४ ॥

इति श्रीवास्तुशास्त्रे राजवल्लभमंडने (thus always) शकुनलक्षणं नाम चतुर्दशमो ऽध्यायः ॥

[H. T. COLEBROOKE.]

3143.

826. Foll. 28; size 12¾ in. by 4¾ i.n; fairly good Devanāgarī writing of 1800 A.D.; twelve lines in a page.

Rājavallabhamaṇḍana.

This MS., though far less correct than the preceding one, was apparently copied from the same original.

[H. T. COLEBROOKE.]

3144.

2046a. Foll. 48; size 11¼ in. by 5¼ in.; clear, modern Devanāgarī writing; ten lines in a page.

The same work.

Colophon: इति श्रीमंडनसूत्रधारविरचितो राजवल्लभः समाप्तो ऽयं ॥ [GAIKAWAR.]

3145.

